गायत्री
पृष्ठ
४०१ से ५००

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 260.

गादाधरी ।

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Chakravartin. With Text.

Edited by *Mahâmahopádhyáya Vindhyeswarî Prasâda Dvivedin, Librarian, Govt. Sanskrit College, Benares,*
and Nyâyâchârya Vâmâcharana Bhattâchârya,
Professor of the same College, and
Śreerâma Śâstrî Bhándári.

BENARES.

FASCICULUS VI–६.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta, at the Vidya Vilas Press, Benares.

1918.

Price Rupee one.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२६०

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आनका ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १२
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया-व्याख्यया सहितम् । सम्पूर्णम् । १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता संपूर्णा (मीमांसा) ... २
(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्-विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री६श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् वेदान्तः १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः । सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) ... २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ११

समवायादिर्विशेषणसम्बन्धः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदकसम्बन्ध इतिमताभिप्रायेणेदं तथा चोक्तस्थलेऽपि हेतुतावच्छेदकसम्बन्धः शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धमात्रविवक्षया न प्रतीकार इति वाच्यं हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धेन भाननियमेन व्यापकताशरीरघटकाभावाधिकरणेऽपि तदीयतादृशसम्बन्धस्य निवेशितत्वात्तन्ते एव हेतुतः पक्षे साध्यानुमितिनिर्वाहे विशिष्टत्वेन सत्तादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकतापातात् न च दर्शितरीत्या विशिष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहित्वेऽपि विशिष्टे पक्षधर्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वानियमान्न विशेषणहेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमितिपूर्वमावश्यकतेति वाच्यं साध्ये विशिष्टहेतोर्व्यापकताग्रहेऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वे ऽनुमित्यनुत्पत्त्या विशिष्टहेतुकस्थले विशिष्टाधिकरणत्वघटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव परामर्शस्यानुमितिहेतुता वाच्या अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटत्वप्रसङ्गात् तथा च साध्यवति विशिष्टहेत्वधिकरणत्वभाने विशेषणस्य परम्परासम्बन्धस्यापि तत्र भाननियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात् । मैवं विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्मिपारतन्त्र्येणैव विशिष्टाधिकरणविशेषणतया प्रवेशः न तु स्वातन्त्र्येण तथा च तद्ग्रहे न विशेषणव्यापकतावगाहित्वनियमो निर्वहति विशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात् विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्त्वान्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वे प्रतियोगितावच्छेदकत्वपर्याप्तिभानासम्भवात् अभावप्रतियोगिप्रकारघटकस्य उपलक्षणतया भानानुपगमात् न च परम्परासम्बन्धेन विशेषणनिष्ठव्याप्त्यवगाहि-

परामर्शनिष्ठकारणताया उभयवादिसिद्धत्वाद्विशिष्टहेतुकपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थले ऽधिकरणे स्वातन्त्र्येण विशेषणवत्त्वभानमुपगस्यविशेषणेऽपि व्याप्तिभानं कल्पनीयमिति वाच्यं शब्दाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहे स्वातन्त्र्येण विशेषणवत्त्वगर्भव्याप्तिभानानियमात् तादृशव्याप्तिबोधकशब्दस्य स्वातन्त्र्येण विशेषणवत्त्वाभासकत्वात् । अथ तदुत्तरं विशेषणे मानसव्याप्तिग्रह एवानुमित्यर्थं कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति चेन्न । एवं सति दण्डाद्युपलक्षितधर्मिहेतुकानुमितेर्विलयप्रसङ्गात् तद्धेतुकव्याप्तिग्रहस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्तिग्रहस्य कल्पनसम्भवात् स्वान्तत्र्येण सकलपरम्परासम्बन्धघटितसकलविशेषणावत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानियमाच्च ।

ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे एकैव हि सा व्याप्तिरिति मूलग्रन्थविरोधः महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासम्भवादित्यत आह सामानाधिकरण्यव्यक्तीनामिति ।

(दी०) सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यम् । वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वृत्ति धूमत्वादिकं वा व्याप्तिः ।

(गा०) भेदेऽपीति । अधिकरणभेदेन धूमादिभेदेन चेत्यादिः । निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं अधिकरणतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदैक्यात् साध्यहेतुभेदे ऽप्यभेदात् तदभेद तात्पर्येण ऐक्यं भाक्त एकत्वव्यवहारः । ननु लक्षणया तद्व्यवहारसमर्थनमसङ्गतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्त्यैक्यकथनात् तन्निर्वाहस्य च सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादरैक्येऽपि प-

क्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं विना पूर्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् पक्षीयधूमे तदुपनयासम्भवेनायोगात् अतोऽतिप्रसङ्गेन च धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासम्भवात् धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरे प्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदं च दर्शयति वस्तुतस्त्वित्यादिना । प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्वत्वाद्यप्रवेशेन लाघवेन सामान्यप्रत्यासत्तिपक्षे तज्ज्ञानस्यैवानुमितिहेतुत्वमिति सूचनाय । रासभादिसाधारण्यादिति तत्साधारण्ये च भ्रमं विनापि रासभादिलिङ्गकवह्न्याद्यनुमानापत्तिरिति भावः । अथ व्यापकताप्रविष्टहेतुतावच्छेदकधर्मितावच्छेदककसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमान्नायमतिप्रसङ्गः धूमत्वादिप्रकारेण भासमाने रासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमात् वक्ष्यमाणधूमत्वादिमन्निष्ठवह्न्यादिसामानाधिकरण्यस्य व्याप्तित्वेऽपि तद्धर्मितावच्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुताया अवश्योपेयत्वात् अन्यथा विशिष्टसत्तादिव्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसामानाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणरूपपक्षे ऽभ्रान्तस्य द्रव्यत्वाद्यनुमानापत्तेः साध्यसामानाधिकरण्यविशिष्टवत्त्वस्य पक्षे साध्यनिश्चयं विना दुर्निश्चेयतया तदुपलक्षितवत्तानिश्चयस्याप्यनुमितिहेतुताया उपगन्तव्यत्वात् केवलसामानाधिकरण्यप्रकारेण पक्षधर्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाववान् पक्ष इत्यसिद्धिग्रहदशायामपि साध्ये धूमादिव्यापकताज्ञानादप्यनुमित्यापत्तेश्च असमानप्रकारकतया धूमाभाववान् पक्ष इत्यादिबुद्धेर्धूमवृत्तिसामानाधिकरण्यवद्वान् पक्ष इत्यादिज्ञानाविरोधित्वादिति चेत् । सत्यं धूमत्वादिमति सामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टविशेषणतापन्नं सामानाधिकरण्यमित्यर्थः । न तु धूमादिवृत्तित्वविशेषितसामानाधिकरण्यमिति तथा च एकधर्मिविशेषणतापन्नधूमत्वादिरूपहेतुतावच्छेदकसामानाधिकरण्योभयं व्याप्तिरिति पर्यवसितं कारणं च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादिरेव परामर्शः तावतोक्तोभयस्य हेतुविशेषणतया ऽनुमितिजन

कज्ञानविषयत्वरूपव्याप्तित्वनिर्वाहः द्वितीयपक्षे च धूमव्यापक-वह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान् पर्वत इति ज्ञानं हेतुः न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववत्त्वान् पक्ष इत्याकारकं तादृशज्ञानस्य धूमाभाववान् पक्ष इत्याकारकधूमत्वत्वाद्यप्रकारकासिद्धिज्ञानाप्रतिबध्यत्वात् एतन्मते च हेतुतावच्छेदकवृत्त्यसाधारणधर्मावच्छिन्ने साध्यसमानाधिकरणावृत्तित्वमेव विरोधः न तु हेतुतावच्छेदकावच्छिन्ने साध्यासामानाधिकरण्यमुपदर्शितज्ञानस्य हेतुतावच्छेदकं धर्मितावच्छेदकीकृत्य सामानाधिकरण्यानवगाहितया तथाविधविरोधज्ञानाप्रतिबध्यत्वात् यदि विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते तदा समानाधिकरणवृत्तित्वांशे निर्धर्मितावच्छेदकसमानाधिरणवृत्तिमद्धूमवान् पर्वत इत्येतादृशमपि ज्ञानं हेतुरुपेयते अन्यथा धूमत्वत्वादिविषयितायाः कारणतावच्छेदककुक्षौ प्रवेशे गौरवात् सामानाधिकरण्यप्रकारकत्वापेक्षया समानाधिकरणवृत्तिप्रकारकत्वस्य गुरुत्वेपि सामान्यस्याप्रत्यासत्तित्वे विशिष्टपरामर्शनिर्वाहानुरोधेन तेन रूपेण हेतुताया अगत्योपगमात् । आद्या हेतुतावच्छेदकधर्मसहितसाध्यसामानाधिकरण्यरूपा । भिन्नेति प्रतिधूमादिकमित्यादिः । द्वितीया साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपा अभिन्ना सर्वधूमादिसाधारणी अनुगतरूपावच्छिन्ना । नानाव्यक्तिदण्डादिविशिष्टहेतुकस्थलेऽपि परम्परासम्बद्धदण्डत्वाद्यखण्डधर्म एव हेतुतावच्छेदकतया उपगन्तव्य इति भावः । यद्यपि साध्यसामानाधिकरण्यावच्छेदकरूपवक्ष्यमाणव्याप्त्यभिप्रायेणापि एकैव हि सा व्याप्तिरित्यादिग्रन्थः सङ्गच्छते तथापि स्वयं तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशस्य खण्डनीयतया स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वरूपपारिभाषिकावच्छेदकत्वस्यैव च विवक्षणीयतया एतदपेक्षया तादृशी व्याप्तिर्गुरुशरीरेति कथं चिदीदृशव्याप्तेरैक्योपपत्तिसंभवेन तज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपादितम् ।

मिश्रादिमतमवलम्ब्य प्रतियोग्यसमानाधिकरणपदप्रयोजनमाह अयं कपिसंयोगीति ।

(दी०) अयं कपिसंयोग्येतद्वृक्षत्वादित्यादिसंग्रहायासमानाधिकरणान्तम् । यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत् संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्तावविरोधात् । तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात् परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इति नाध्यक्षमिति तन्न । द्रव्ये संयोगसामान्याभावे मानाभावात् ।

(गा०) अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमे कपिसंयोगाद्यनवच्छेदकमूलादेः पक्षतावच्छेदकत्वे तदवच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादेः सिद्धिप्रसङ्गः न चेष्टापत्तिः सल्लिङ्गकपरामर्शस्य भ्रमानुमित्यजनकत्वनियमात् न च तदवच्छेदेन हेतुमत्ताज्ञानस्य तदवच्छेदेन साध्यानुमितिहेतुत्वादे तद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किञ्चिदवच्छेदेनावृत्तेर्नातिप्रसङ्ग इति वाच्यं यदि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितावपि तादृशहेतुमत्ताज्ञानत्वेन हेतुत्वमुपेयते तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलाद्यवच्छिन्नसंयोगादिविशेषस्यापि कपिसंयोगादिव्याप्यतया तेन हेतुना मूलाद्यवच्छेदेन कपिसंयोगाद्यनुमितेर्निष्प्रत्युहत्वादिति चेत् अत्रोपाध्यायाः । साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्मत्वमनुपपन्नमिति पक्षधर्मताबलात्पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यं सिद्ध्यति न तु तदवच्छेदेनापि प्रमाणाभावादिति तादृशानुमितेरप्रामाणिकतया तत्र परामर्शहेतुताकल्पनमेव नास्तीति न तथापत्तिरिति समादधिरे । मिश्रादयस्तु बाधानवतारे मूलाद्यवच्छेदेन कपिसंयोगादिसिद्धिरिष्टैवेति वदन्ति एतत्तत्त्वं ग्रन्थकृद्धेत्वाभासे वक्ष्यति । प्राचीनसिद्धव्यावृत्तिस्थलं दूषयितुमुपन्यस्यति यत्त्विति । तत् असमानाधिकरणान्तम् । ननु द्रव्ये संयोगत्वावच्छिन्नाभावसत्त्व एवावच्छेदकगर्भोक्तलक्षणाव्याप्तिः प्रसज्यते तदेव न विरोधात् वृक्षादौ च संयोगानवच्छेदकीभूतभागाप्रसिद्ध्या तत्सामान्याभावावच्छेदक एव दुर्लभः शाखामूलादीनां सर्वेषां तत्तत्संयोगावच्छेदकत्वादित्यत आह सं-

योगस्येति। वृक्षत्वावच्छेदेनेति वृक्षत्वादेः प्रत्येकं सकलसंयोगातिप्रसक्तत्वात्तस्य संयोगावच्छेदकत्वासम्भवात् आकाशादिसंयोगस्यापि यावद्वृत्तेरेकस्याभावाद्वृक्षत्वे तत्संयोगानतिप्रसङ्गासम्भवादिति भावः। ननु वृक्षत्वावच्छेदेन वृक्षादौ संयोगसामान्याभावसत्त्वे वृक्षे संयोगो नास्तीत्यादिप्रत्यक्षापत्तिरित्यत आह तत्र चेति। अतीन्द्रियस्येति अतीन्द्रियप्रतियोगिकतया संयोगसामान्याभावस्यातीन्द्रियत्वमिति भावः। प्रतियोगितावच्छेदकयोग्यत्वस्य तन्त्रत्वे त्वाह परित इति। यद्वा ननु संयोगसामान्याभावस्य वृक्षे सत्त्वे महत्त्वोद्भूतरूपवन्मात्रसमवेतसंयोगसामान्याभावोऽप्यावश्यकः तद्व्यापकधर्मावच्छिन्नाभावस्य तद्धर्मावच्छिन्नाभावानियतत्वादिति योग्यमात्रप्रतियोगिको ऽयमभावः कथं वृक्षे साक्षात्क्रियते इत्यत आह परित इति। प्रतियोग्युपलब्धेर्विभिन्नावच्छेदेनाभावग्रहं प्रति विरोधिज्ञानमुद्रया प्रतिबन्धकत्वं न सम्भवतीति तस्य दोषत्वकथनं दोषविधया प्रतिबन्धकत्वलाभाय। अथ यत्र संयोगाविषयकमेवोपनीतभानाद्यात्मकं वृक्षादिरूपाधिकरणज्ञानं तदग्रिमक्षणे वृक्षादौ तादृशसंयोगसामान्याभावग्रहप्रसङ्गः तादृशदोषस्य प्रागसत्त्वात् एवं वृक्षे न संयोग इत्यादिलौकिकप्रत्यक्षस्यालीकतया तत्र तादृशप्रतिबन्धकत्वकल्पनमेवाशक्यमिति चेन्न वृक्षादौ संयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसिद्धत्वेऽपि गुणादौ तत्प्रसिद्ध्याऽधिकरणीयविषयतासम्बन्धेन संयोगाभावलौकिकत्वावच्छिन्नं प्रति स्वविषयसंयोगवत्त्वसम्बन्धेन प्रत्यक्षत्वेन प्रतिबन्धकत्वकल्पनात्सर्वत्र द्रव्ये तत ईश्वरीयप्रत्यक्षस्यैव सर्वदा तादृशसम्बन्धेन सत्त्वेनातिप्रसङ्गाविरहात्। इदमापाततः द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणसम्भवेन तादृशप्रतिबन्धकताकल्पनस्यायुक्तत्वात् कथञ्चिदापत्तिसम्भवेऽपि लाघवात्तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन संयोगाभावलौकिकप्रत्यक्षं प्रति प्रतिबन्धकत्वौचित्यात्। मानाभावादिति लौकिकप्रत्यक्षस्य योग्यानुपलब्धिविरहेणासम्भवादुपनीतभानस्य संयोगाभावो वृक्षावृत्तिरित्याकारकविष-

रीतविषयकस्याप्युपनयवशेन सम्भवाद्विनिगमनाविरहेण एकतरस्य प्रामाण्यासिद्धेः शब्दस्याप्तोक्तत्वासिद्ध्या तदव्यवस्थापकत्वात् अनुमानस्य च लिङ्गाभावेनासम्भवादिति भावः।

ननु वृक्षादौ यावत्संयोगविशेषाभावानामुभयसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्युहैवेतिशङ्कां निरस्यति न चेत्यादिना।

(दी०) न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानितिव्याप्तेर्यावत्संयोगाभावा एव मानम्। यत्तदर्थयोरननुगमात् एकावच्छेदेन तदीययावद्विशेषाभाववत्त्वस्योपाधित्वाच्च। एतेनायं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादितिपरास्तम्। व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च। न च प्रतियोग्यनवच्छेदकतयैव वृक्षत्वादेरभावावच्छेदकत्वम्। गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात्। यथा च घटपूर्ववर्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः।

(गा०) यः संयोगीययावद्विशेषाभाववान् स संयोगसामान्याभाववानितिव्याप्तेरेवाग्रे व्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेण निराकरणीयतया प्रथमतः सामान्यमुखीव्याप्तिमनुमानोपष्टम्भकतया दर्शयति योयदीयेति। यद्धर्माश्रयस्य यावद्विशेषाभाववान् यः स तद्धर्मावच्छिन्नाभाववानित्यर्थः संयोगत्वाश्रयस्य विशेषधर्मावच्छिन्नाभावकूटं वृक्षादौ वर्तत इति तत्रोक्तव्याप्तेः संयोगत्वावच्छिन्नाभावसिद्धिः प्रतियोगिनोर्यत्त्वतत्त्वेन निवेशे संयोगवृत्तिकपिसंयोगत्वादिरूपसामान्यधर्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादिति धर्मस्य यत्त्वतत्त्वेनोपादानं संयोगादिसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नाभावमादाय सिद्धसाधनवारणाय समवायसम्बन्धावच्छिन्नाभाव एव साधनीयः अन्यसम्बन्धा-

वच्छिन्नविशेषाभावकूटस्य तत्सम्बन्धावच्छिन्नसामान्याभावस्य व्यभिचारित्वे समवायसम्बन्धावच्छिन्नविशेषाभावकूटस्यापि तत्सम्बन्धावच्छिन्नसामान्याभावव्यभिचारित्वं तुल्यन्यायेन सम्भाव्येतेति प्रतियोगितावच्छेदकसम्बन्धानामपि यत्त्वतत्त्वेन व्याप्तावन्तर्भावः अत एव समवायसम्बन्धावच्छिन्नप्रतियोगिताकयावद्विशेषाभावेन हेतुना तत्सम्बन्धावच्छिन्नसंयोगसामान्याभावसिद्धिः यद्धर्माश्रयविशेषाभावश्च उभयावृत्तियद्धर्मसमानाधिकरणधर्मावच्छिन्नाभावः उभयावृत्तित्वं च स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन भेदवदन्यत्वम्। अतः संयोगत्वाद्यपेक्षया वृक्षवृत्तिसंयोगत्वादेः विशेषधर्मत्वेऽपि संयोगसामान्याभावं वृक्षादावनभ्युपगच्छतोऽवयवविशेषरूपावच्छेदक दुर्भिक्षेण वृक्षवृत्तिसंयोगत्वावच्छिन्नाभावस्य वृक्षादावनभ्युपगमेऽपि च न सन्दिग्धासिद्धिः वृक्षवृत्तिसंयोगत्वादीनामुभयवृत्तित्वेन तदवच्छिन्नाभावव्यावृत्तेः न च हेतावुभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेऽपि व्यभिचारावारकतया वैयर्थ्यं यावत्त्वविशेषस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृशधर्मावच्छिन्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टमिति तु न सत् तथा सति यत्तत्पदार्थस्य हेतुसाध्यशरीराप्रवेशेन सामान्यव्याप्तित्वानुपपत्तेरिति वाच्यं यावत्पदस्य व्यापकत्वार्थकतया तद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावत्वनिरूपितायाः आधेयत्वसम्बन्धावच्छिन्नव्यापकतायाः एव हेतुतया विशेषधर्मव्यापकत्वाघटकाभावान्तरस्यैव च सामान्यधर्मव्यापकताघटकतया वैयर्थ्यानवकाशात् न च तादृशाभावत्वव्यापकत्वं तादृशाभावत्ववन्निष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनावच्छेदकमधिकरणमप्रसिद्धमिति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम्। आधेयतासम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन प्रतियोगितायाः अभावस्यैव प्रतियोगितानवच्छेदकत्वस्थाने निवेशनीयत्वात् उक्तस्थले व्यधिकरणतादृशसम्बन्धावच्छिन्नाभावप्रसिद्धिसौलभ्यात् यद्धर्मसमानाधिकरणेत्यत्र प्रतियोगितावच्छेदकत्वेन धर्मो विशेषणीयः तेन कम्बुग्रीवादिमत्त्वादिव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभाववतस्तद्धर्मावच्छिन्नाभावाप्रसि-

च्छा तादृशाभाववत्त्वासम्भवेपि न क्षतिः । न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटाद्यन्यतरत्वव्याप्यधर्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववतस्तद्धर्मावच्छिन्नप्रयोगिताकाभाववत्त्वासम्भवाद्व्यभिचारः वाच्यत्वादेः संयोगादिनावृत्तित्वात् तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादेरेव तत्प्रतियोगितावच्छेदकत्वसम्भवेन गुरोरन्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वादिति वाच्यं वाच्यत्वादिसाधारणान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादिनानवच्छेदादगत्या गुरुणान्यतरत्वादिनैव तदवच्छेदात् । वस्तुतो यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यहेतुघटकता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्मस्य विशेषणीयतया उक्तसामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेऽपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतया तत्सम्बन्धावच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः अत एव भेदप्रतियोगितावच्छेदकजातित्वघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासंभवेपि न जातित्वादिसामान्यव्याप्तिभङ्गः । वस्तुतस्तु यद्धर्मे प्रतियोगितावच्छेदकत्वाविशेषणमनुपादेयमेव कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिष्ठभेदप्रतियोगित्वस्य घटत्वादिघटिततादृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मे इत्यनेन कम्बुग्रीवादिमत्त्वरूपगुरुधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षे ऽसम्भवेन व्यभिचारानवकाशात् । अभावे यावत्त्वादिविशेषणप्रवेशाद्यत्किञ्चिज्जात्यादिव्यक्त्यभाववति जात्यादिसामान्याभावासत्त्वेपि न सामान्यव्याप्तिभङ्गः । यद्यपि यत्तदर्थघटितसाध्यहेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभावतदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथापि एतद्दोषस्य स्वयमग्रे वाच्यतया यथाकथंचिच्छङ्कासंगतिः । अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवाद्यसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे कालविशे-

षावच्छेदेनापि तत्र तदभावासंभवात् तयोस्तदविरोधितामते द्रव्ये संयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्तावविरोधात् न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमूलाद्यवच्छेदेनाभावः सुलभ इति वाच्यं तासां भेदस्याप्रामाणिकत्वात् न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्तत्संयोगव्यक्तौ तत्तदवयवव्यक्तीनां तादात्म्यसम्बन्धेन कारणतायां व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः आवश्यकश्चावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः अन्यथा मूलादिमात्रावच्छिन्नमूर्तान्तरसंयोगानामग्राद्यवच्छेदेनैतद्वृक्षादिवृत्तिविभुसंयोगानां च वृक्षान्तरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभत्वापातादिति वाच्यं व्याप्यवृत्तेरवच्छिदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुताविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्तन्निष्ठावच्छेदकताव्यक्तीनामभेदेपि व्यभिचारानवकाशात् अन्यथा मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्रावच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूलादेस्तत्र व्यभिचारस्य दुर्वारत्वात् न च मूलावच्छिन्नसंयोगानामग्रावच्छिन्नसंयोगादेरपि भेदः स्वीकर्तुं शक्यते मूले प्राच्यां शरीरवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्याद्यवच्छिन्नत्वावगाहनात् न चाग्रमूलयोः शरीरसंयोग इत्यस्या इव तादृशप्रतीतेरपि संयोगद्वयावगाहित्वमस्मदनुमतमिति वाच्यं यत्र मूलप्रतीचीमात्रावच्छिन्नः एकशरीरेण संयोगः अग्रप्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूले प्राच्यां शरीरसंयोग इति प्रत्ययापत्तेः शरीरतरुसंयोगव्यक्तीनामैक्यैकासामेव शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दर्शितसम्बन्धसंकोचमन्तरेण दुर्वारत्वाच्च न हि तत्र शरीरावयवावच्छिन्नशरीरतरुसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदसम्भवः तथा सति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चरणावच्छिन्नशरीरसंयोगस्य वृक्षे व्याप्यवृत्तितया तदभावास-

त्वप्रसङ्गात् तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु संयोगनिष्ठतत्तद्व्यक्तित्वम् अनन्तकार्यकारणभावप्रसङ्गात् तथा च एकावच्छिन्नसंयोगस्यापरावच्छेदकावच्छिन्नत्वेपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्केत्यपि वदन्ति । यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाग्राद्यवच्छिन्नतरुविभुसंयोगादीनां भेदस्वीकार आवश्यक इति । तदपि न सम्यक् तादृशसंयोगव्यक्तीनां गगनादौ दिग्विशेषरूपावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः । अत्र वदन्ति । द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकतायास्तन्नेत्यादिनोक्तेर्न चेत्यादिना गगनादेरेव संयोगसामान्याभावसाधकमनुमानमाशङ्कितं विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्विशेषावच्छिन्नतया तत्तद्व्यक्तित्वेन तत्र तदभावसत्त्वे ऽविवादान्नासिद्धत्वकाशः विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगि द्रव्यत्वादित्यादौ व्यावृत्तिसङ्गतेर्वृक्षादावेतद्व्याप्तिबलात्संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियमसत्त्वे वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धेः संभवेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामाशङ्कां न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यति पूर्वमपि वृक्षत्वावच्छेदेन संयोगसामान्याभाववृत्तिरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वानियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोगतत्सामान्याभावयोर्वृत्तौ अवच्छेदकभेद उपपादितः वृक्षे न संयोग इति प्रत्यक्षं च वारितं न तु यो यदीयेत्यादिनियमस्य तत्साधकत्वाशयेनेति न सन्दर्भविरोध इति । यत्र यत्किञ्चिदवयवनाशान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिस्तत्क्षणे पूर्वोत्पन्नक्रियातो ऽवस्थितयावत्तदवयवैर्गगनादिसंयोगानां विनाशः द्वितीयक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र वृक्षे विभुसंयोगानुत्पत्त्या यावद्विशेषाभावसौलभ्यं न चैवं तादृशवृक्षे मूर्तान्तरेणापि संयोगस्तदवयवसंयोगैस्तत्कर्मणा वा न सम्भवति तदवय-

धगगनादिसंयोगनाशककर्मणा मूर्तान्तरतदवयवसंयोगानामपि तदुत्पत्तिकाले विनाशादवयवावयविनोः संयोगानभ्युपगमेन तदवयवेष्वेवारम्भकसंयोगसत्त्वे तेन तन्निष्ठसंयोगजननासंभवात् उत्पत्तिकाले च द्रव्ये गुणवत्कर्मसत्त्वानुपपत्तेरिति संयोगसाध्यके द्रव्यत्वस्य सद्धेतुतैव न निर्वहतीति वाच्यं तादृशखण्डद्रव्ये तदवयवसंयोगजन्यस्य तत्कर्मजन्यस्य च संयोगस्यासम्भवेपि सर्वत्रैव सतां सदागतिशीलपवनादिपरमाणूनां कर्मभिस्तत्संयोगानुत्पत्तौ बाधकविरहेण द्रव्यस्य संयुक्तत्वनियमादित्यपि कश्चित् । यावत्संयोगाभावा एव मानमिति । ज्ञायमानलिङ्गस्यानुमितिकरणत्वमताभिप्रायेण । यत्तदर्थयोरिति साध्यहेतुघटकयत्तच्छब्दार्थयोः संयोगघटत्वाद्योरित्यर्थः । अननुगमादिति । एकरूपेण निवेशासम्भवादित्यर्थः एकव्याप्तेर्निर्वाहयितुमशक्यत्वादिति शेषः । तथा च घटत्वाद्यवच्छिन्नाभावघटादीविशेषाभावकूटयोर्व्याप्तेः संयोगसामान्याभावसिद्धावनुपयोगित्वाद्यावत्संयोगविशेषाभावे संयोगसामान्याभावीयविशेषव्याप्तेश्चाग्रे निराकर्तव्यत्वान्नोक्तानुमानसम्भव इति भावः । ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्तेरग्रहेपि यथा यो यत्र प्रवर्तते स कार्यतया तज्जानातीत्याकारात् स्तनपानादिप्रवृत्तितद्विषयककार्यताज्ञानयोर्व्याप्तिग्रहात् गवानयनादिप्रवृत्तिलिङ्गेन गवानयनादिकार्यताज्ञानस्य सिद्धिः तथा प्रकृते संयोगीययावद्विशेषाभावे तत्सामान्याभावव्याप्तेर्व्यर्थविशेषणत्वादिना अग्रहेपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीययावद्विशेषाभावे पक्षधर्मताज्ञानाद्गगनादौ संयोगसामान्याभावसिद्धिर्दुर्वारैव व्यतिरेकिहेतुकानुमिताविव सामान्यव्याप्त्यधीनविशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुत्वानुपगमात् न च विशेषाभावान्तरे सामान्याभावान्तरव्याप्तिग्रहात्संयोगविशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितकपिसंयोगादिप्रतियोगिकाभावे कपिसंयोगादिसामान्याभावव्याप्तिग्रहादेव संयोगादिप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भवाद्यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुतुल्यानिखिलहेत्वन्तरेषु प्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षायाः स्वीकर्तुमशक्यत्वात् तादृशसकलहेतुसाध्यानां युगसहस्रेणासर्व-

शैर्ज्ञातुमशक्यत्वादिति वाच्यम् । उपस्थितयावत्तादृश-हेतुषु तादृशतत्तत्साध्यव्याप्तिग्रहापेक्षया सामञ्जस्यात् तावन्मात्रापेक्षायाश्च तत्तत्साधनधर्मिकतत्तत्साध्यव्याप्तिग्रहाभाव-विशिष्टतत्तत्साध्यसाधनोपस्थितेरनुमितिप्रतिबन्धकतया सूपपादत्वात् एवं सति यावत्त्वविशेषणानुपादाने जात्यादिविशेष-घटत्वाद्यभावे जात्यादिसामान्याभावव्यभिचारोपस्थितिदशायां संयोगादिसामान्याभावसाधनासम्भवेन तादृशविशेषणसार्थक्यात् गगनाद्यवृत्तिस्वसमानाधिकरणनिरुक्तधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावकं यद्यत्स्वं तदन्यो यो धर्मः स तन्निष्ठाभावप्रतियोगितावच्छेदक इत्येतादृशोक्तसामान्यव्याप्तिस्थलाभिषिक्तव्याप्त्यैव वा संयोगत्वादौ गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वं साधनीयं तत्रानुमाने उपाधिमाह एकावच्छेदेनेति । अनवच्छिन्नतदीययावद्विशेषाभावाधिकरणत्वस्य उपाधित्वादित्यर्थः यथाश्रुते गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तितया ऽवच्छेदकविरहेण उपाधेः साध्यव्यापकत्वानिर्वाहात् । न च गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तित्वेपि गुणत्वाद्यवच्छिन्नत्वमावश्यकमन्यथा ऽधिकरणतावच्छेदकप्रकारकज्ञानासम्भवेन गुणादौ तदभावग्रहासम्भवादितिवाच्यं द्रव्यनिष्ठयावत्संयोगाभावाधिकरणताया अपि द्रव्यत्वादिरूपैकावच्छिन्नतयोपाधेः साधनाव्यापकतानिर्वाहाय सप्तमीनिर्देश्यं यदव्याप्यवृत्तित्वनिर्वाहकं विलक्षणमवच्छेद्यत्वं तस्यैव विवक्षणीयतया गुणादिनिष्ठसंयोगाद्यभावाधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध्यव्यापकताया यथाश्रुते दुरुपपादत्वात् । अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छेदेनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिनिर्वाहः । अत्र केचित् अवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववद्यावद्विशेषाभाववत्त्वमिहोपाधित्वेनाभिमतं गुणे यावद्विशेषाभाववत्त्वमवच्छिन्नत्वाभावेनोक्ताभयाभाववत् कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकावच्छिन्नमिति तदनवच्छि-

न्नत्वाभावादुभयाभाववदिति नोक्तोपाधिसाध्ययोः सामान्यव्याप्तिभङ्गः। अथ वृक्षादिनिष्ठानां यावत्कपिसंयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वं सम्भवति वृक्षाद्यवृत्तिकपिसंयोगादिव्यक्तीनां ये ऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात् न च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतया अन्यासां चैकावच्छेदकावच्छिन्नतया सर्वास्वेव तासु उभयाभावो ऽक्षत इति वाच्यम् । एवं सति पक्षनिष्ठसंयोगव्यक्तीनां दिग्देशविशेषाद्यवच्छिन्नानां यावन्तोऽभावाः पक्षनिष्ठतावन्निरूपिताधिकरणतानां सर्वासामेकावच्छेदकविरहेपि द्वित्वादीनामवच्छेदकैक्यसम्भवेन सर्वास्वेव तादृशतादृशावच्छेदकमादायैकावच्छेदकावच्छिन्नत्वं सम्भवतीत्युभयाभावसत्त्वादुक्तोपाधेर्यावत्संयोगाभावरूपसाधनव्यापकतापत्तेः स्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्य एकावच्छेदकावच्छिन्नत्वरूपत्वे च वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकरणतास्वपि न तथात्वसम्भवस्तत्समानाधिकरणव्याप्यवृत्तिकपिसंयोगाभावाद्याधिकरणतानामपि तादृशयावदधिकरणतान्तर्गतत्वात्तदवच्छेदकस्य चाप्रसिद्धत्वादिति चेन्न एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरणकिञ्चिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षितत्वे नानवच्छिन्नाधिकरणताभिः सहावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेपि क्षतिविरहात् । अथवा यावद्विशेषाभाववत्त्वमित्यनेन यावत्तदीयविशेषाभावत्वावच्छिन्ननिरूपितमेकाधिकरणत्वं विवक्षितं न तु तत्समुदायः एकावच्छेदकावच्छिन्नत्वं च एकमात्रवृत्तिधर्मावच्छिन्नावच्छेदकावच्छिन्नत्वं न त्वभिन्नावच्छेदकत्वं वृक्षावृत्तिसंयोगानां वृक्षनिष्ठाभावा यद्यपि व्याप्यवृत्तयस्तथापि अव्याप्यवृत्तिसाधारणयावत्त्वेन तेषामव्याप्यवृत्तित्वात्तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणता एकमात्रवृत्तितत्तन्मूलत्वाद्यवच्छिन्नतत्तन्मूलादिरूपावयवावच्छिन्नेति तत्रोभयाभावो ऽक्षत इति न साध्योपाध्योः सामान्यव्याप्तिभङ्गः पक्षनिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणता च न प्रत्येकावच्छेदकावच्छिन्ना मूले वृक्षो यावत्संयोगा-

भाववान् इत्यादिप्रतीतिविरहात् अपि त्वनुगतरूपावच्छिन्नतदवच्छेदकावच्छिन्ना यावत्संयोगाभाववद्गगनमितिप्रत्ययात् एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वविरोधात् एकस्यापि विशेषरूपसामान्यरूपाभ्यामुभयावच्छेदकत्वोपगमात् तथा च वृक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिताधिकरणता न निरुक्तैकावच्छेदकावच्छिन्नत्ववतीति तस्या उक्तोभयवत्त्वादुपाधेः साधनाव्यापकत्वमिति वदन्ति । वस्तुतस्तु अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिः तादृशोपाधिना साध्यस्य सामान्यव्याप्तिविरहेपि संयोगसामान्याभावरूपपर्यवसितसाध्यव्यापकतया तादृशोपाधेः सत्प्रतिपक्षोत्थापकत्वमव्याहतं तादात्म्येन साध्यवतोऽप्युपाधिव्याप्यतया तादृशोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवद्भेदो ऽन्यत्राप्रसिद्धोपि साधयितुं शक्यत एव अभावसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धेरपेक्षितत्वात् उपाध्यभावेन साध्याभावसाधनं तु न सम्यक् संयोगरूपस्य तस्य साधने सिद्धसाधनात् पक्षावृत्त्युपाधिव्याप्यत्वेन साध्ये पक्षावृत्तित्वसाधनात्सत्प्रतिपक्षनिर्वाह इति केचित् । सिद्धसाधनादितः साध्याभावसाधनासम्भवेपि प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकतया गृह्यमाणोपाधितावच्छेदकावच्छिन्नाभाववत्ताज्ञानात्पक्षे साध्यानुमितिप्रतिरोध एवेति सारम् । अथवा प्रतियोग्यधिकरणत्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया एकावच्छेदेनेत्यादेर्यथाश्रुतस्यैवोपाधितानिर्वाहः यत्र प्रतियोगिमति यस्य सामान्याभावस्तत्रैकावच्छेदेन तस्य यावद्विशेषाभाववत्त्वनियमेन सुग्रहत्वात् गुणादावेकावच्छेदेन यावद्विशेषाभावासत्त्वेपि तत्र प्रतियोग्यसत्त्वेनावच्छिन्नसाध्यव्यापकत्वाक्षतेश्च । द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत्संयोगविशेषाभावाधिकरणे एकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् प्रतियोगिमत्त्वरूपावच्छेदकविशिष्टसाधनाव्यापकत्वं तस्य वृक्षादिवृत्तिकपिसंयोगादिविशेषाभावाधिकरणताकूटान्तर्गतकतिपयाभावाधिकरणतानामनवच्छिन्नत्वेपि तत्कूटस्य एकावच्छेदकावच्छिन्नत्वं पूर्ववदुपपादनीयम् । अथ एतादृशोपाधेर्व्यभिचारोन्नायकत्वं न सम्भवति प्रकृतसाध्य-

व्यापकस्य एकावच्छेदकावच्छिन्नसंयोगीययावद्विशेषाभाववत्त्वस्याप्रसिद्धेः द्रव्ये तदीययावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वेपि एकावच्छेदकावच्छिन्नत्वाभावात् गुणे च तस्यावच्छिन्नताया एवाभावात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभावव्यापकस्य तदीयैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वस्य प्रसिद्धत्वेपि तदभावेन प्रकृतसाध्यवद्भेदसाधनं न सम्भवति प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभाववद्भेदश्च कपिसंयोगादिरूपप्रतियोगिशून्ये हेतुमति साध्यमानो न कपिसंयोगादिसामान्याभाववद्भेदपर्यवसायी तत्र प्रतियोगिमद्भेदस्याबाधात् प्रतियोगिमति चैकावच्छेदकावच्छिन्नतदीययावद्विशेषाभाववत्त्वसत्त्वेन तद्वत्त्वाभावादिहेतोरसिद्धिरिति न व्यभिचारोन्नयननिर्वाह इति चेत् । मैवं कचिद्द्रव्ये जलादिसंयोगवति तत्सामान्याभावस्य सत्त्वे एकावच्छिन्नतदीययावद्विशेषाभावसत्त्वात्तदीयप्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकैकावच्छेदकावच्छिन्नतदीययावद्विशेषाभाववत्त्वं यत्र च द्रव्ये सर्वावयवावच्छेदेन भिन्नभिन्नाः जलादिसंयोगा वर्तन्ते यावत्तद्विशेषाभावरूपहेतुमति तत्रैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वरूपोपाध्यभावे प्रतियोगिमत्त्वविशिष्टतत्सामान्याभाववद्भेदस्य सिद्धौ बाधकाभावात् प्रतियोगिमति तत्र विशेष्यवद्भेदपर्यवसानेन व्यभिचारसिद्ध्या सामान्यव्याप्तिभङ्गात् संयोगत्वे गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानौपयिकदर्शितव्याप्तावपि एकावच्छेदकावच्छेद्यस्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणताशून्यगगनादिकं यद्यत्तदन्यत्वस्योपाधित्वं बोध्यम् । एतेनेति अनवच्छिन्नयावद्विशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः । इति विशेषव्याप्त्युपष्टम्भमनुमानं परास्तं दूषणान्तरमप्याह व्यर्थेति तन्मते संयोगसामान्याभावस्य केवलान्वयितया ऽभाववत्त्वस्यैव तद्व्याप्यतावच्छेदकत्वेन इतरांशस्य व्यर्थत्वादित्यर्थः नन्वभावादित्येव हेतुरस्त्वित्यत आह अप्रयोजकत्वादिति व्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः । विशेषव्याप्तौ उपाध्यन्तरमपि सुलभमित्याह निर्गुणत्वादेरिति । आदिना निष्परिमाणत्वादेः

परिग्रहः यद्यद्धर्माश्रयानवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टम्भं वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशङ्क्य निराकुरुते न चेति । गुणाद्यनवच्छेदकेति । गुणत्वाश्रयानवच्छेदकेत्यर्थः । तदभावेति गुणत्वाद्यवच्छिन्नाभावेत्यर्थः तथा च गुणत्वाद्यवच्छिन्नस्यापि अव्याप्यवृत्तिताप्रसङ्ग इति भावः । घटादौ द्रव्यत्वावच्छेदेन घटत्वाद्यभावप्रसङ्गो घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्ध्या तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न सम्भवतीति नाभिहितः । गुणत्वाद्याश्रयस्य संयोगादेरवच्छेदकप्रसिद्ध्या न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः । ननु यद्धर्माश्रयानवच्छेदकमित्यत्र यत्पदेन अव्याप्यवृत्त्यवृत्तिधर्मो विवक्षितः गुणत्वादेश्च व्याप्यवृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदकत्वापादकता इत्याशङ्क्य वृक्षत्वादौ संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावसाधकहेतोरसिद्धिमाह यथा चेति । दण्डनिष्ठघटकारणताघटकतदव्यवहितपूर्वकालसम्बन्धस्येत्यर्थः । प्रतिदण्डं भिन्नत्वेपीति दण्डत्वं तत्सामान्यावच्छेदकमित्यन्वयः । प्रतिदण्डं भिन्नत्वेपीत्यनेन दण्डत्वं प्रत्येकातिप्रसक्तमिति सूचितमेवमग्रेपि । तत्सामान्येति घटपूर्ववर्तितात्वावच्छिन्नस्येत्यर्थः । प्रत्येकातिप्रसक्तत्वेपि अवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नानतिप्रसक्ततया तस्यावच्छेदकत्वम् । अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेतिभावः । ननु दण्डत्वस्य घटनियतपूर्ववर्तितावच्छेदकत्वं न घटनियतपूर्ववर्तितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वमपि तु तदव्यवहितपूर्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपपारिभाषिकमेव तच्चातिप्रसक्तेऽपि निराबाधमेव स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वादिति प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह वह्निसामानाधिकरण्यस्येति । प्रतिधूमं भिन्नत्वेऽपि धूमत्वं तत्सामान्यावच्छेदकमित्यन्वयः । तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्येत न च व्याप्यतावच्छेदकत्वमपि स्वविशि-

ष्ठव्यापकसाध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यं साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिस्तत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेषः अत एव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुता तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात् अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्मनिष्ठस्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्तविधया बोध्यं संयोगसामान्यस्य संयोगत्वरूपावच्छेद्यतावच्छेदकरूपावच्छिन्नस्य सुवचत्वाच्चेति प्रत्येकसंयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भावः । यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वाप्रसक्त्या उक्तव्याप्तिबलात्तदवच्छेदेन संयोगसामान्याभावसिद्धिर्न शक्यते वारयितुं तथापि प्रतियोगिमत्सम्बद्धदेशकालयोरेव प्रतियोग्यनवच्छेदकयोरभावावच्छेदकत्वनियमस्तयोरेव तदनुभवात् न तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादित्यत्र तात्पर्यं द्रव्ये संयोगसामान्याभावस्य कालभेदाद्यवच्छेदेन स्वयमनुपदं व्यवस्थापनीयतया सम्प्रदायविद इत्यनेनास्वरसो दर्शितः ।

(दी०) नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्तते तथा धूमवत्यपि विरहो दहनस्य इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याव्याप्यवृत्तित्वात् । वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च । एवं प्रतियोगिमतोरपि कालदेशयोर्देशकालभेदावच्छेदेन तदभावः । तथा च तत्तत्साध्यकाव्याप्तिवारणाय तत् । नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके साध्यसाधनभेदेन व्याप्तिभेदादित्यपि वदन्ति ।

(गा०) गुणस्य सामान्याभावो वर्तत इत्यन्वयः । ध्वंसप्रागभावयोर-

त्यन्ताभावविरोधिताया निराकृतत्वादिति भावः । एतेन तदवच्छेदेन संयोगादिसामान्याभावोऽपि सुतरां वर्तते व्यापकधर्मावच्छिन्नाभाववति व्याप्यधर्मावच्छिन्नाभावसत्त्वनियमादिति सूचितं न चोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोऽपि मानाभावादिति वाच्यं तदा तत्र जन्यैकत्वहेतुभूतस्य एकत्वत्वावच्छिन्नाभावस्यावश्यकतया तस्यैव स्वसमनियतगुणत्वाद्यवच्छिन्नाभावरूपतया विवादायोगात् संयोगादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुस्थले व्यावृत्तिदानायाह प्रलयेति । महाप्रलयस्य जन्यभावानधिकरणतया तदानीं संयोगाद्यसत्त्वादितिभावः । तदानीं च गगनादौ नित्यैकत्वपरिमाणादिसत्त्वेन गुणसामान्याभावस्यासत्त्वात्संयोगस्येत्युक्तम् । अत्र च प्रमाणं महाप्रलये गगने न संयोग इत्यादिप्रामाणिकव्यवहार एव तादृशव्यवहारस्य ध्वंसावगाहित्वे ऽतिप्रसङ्गाद्व्यवहारानादरे चातीन्द्रियगगनादौ गोत्वाद्यभावस्याप्रामाणिकतापत्तेः प्रत्यक्षासम्भवात् अनुमानस्याप्रयोजकत्वात् वह्निमान् धूमादित्यत्रापि व्यावृत्तिदानायाह तथेति । दहनस्य दहनत्वावच्छिन्नस्य प्रतीतेरित्यन्तं द्रव्यस्याव्याप्यवृत्तित्वादित्यत्र हेतुः प्रत्यक्षप्रमाणमुक्त्वा युक्तिमप्याह वृत्तेरिति । संयोगरूपसम्बन्धस्येत्यर्थः । वृत्तिमतो व्याप्यवृत्तित्वस्य संयुक्तस्य तत्सम्बन्धेन व्याप्यवृत्तितायाः असम्भावितत्वादिति । अयमाशयः सम्बन्धिसत्तायाः सम्बन्धाधीनत्वाद्यदवच्छेदेन सम्बन्धो नास्ति तदवच्छेदेन तत्सम्बन्धावच्छिन्नतदभावसत्त्वमावश्यकं संयोगादेः सम्बन्धस्य समवायस्य व्याप्यवृत्तित्वेऽपि न संयोगादेर्व्याप्यवृत्तिता गुणादौ समवायसत्त्वेऽपि संयोगाद्यसत्त्ववत्संयोगाद्यनवच्छेदकावच्छिन्ने संयोगादिमति तत्समवायसत्त्वेऽपि तदभावोपपत्तेरिति । केचित्तु वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्ववत् वृत्तेर्व्याप्यवृत्तित्वे वृत्तिमतोऽपि व्याप्यवृत्तित्वं युक्तितौल्यात् संयोगादिप्रतियोगिकत्वविशिष्टसमवायोऽपि न व्याप्यवृत्तिरित्याहुः । वह्निमान् धूमादित्यादौ कालविशेषावच्छेदेन हेतुमति वर्तमानं साध्याभावमादाय घटत्ववान् कालत्वादित्यादौ पटाद्यवच्छेदेन काले वर्तमानं कालिकसम्बन्धावच्छिन्नाभावमादाय च व्यावृत्तिदानायाह

एवमिति । प्रतियोगिमतो देशस्य प्रतियोग्यनधिकरणकाला-वच्छेदेन प्रतियोगिमतः कालस्य च प्रतियोग्यनधिकरणदेशाव-च्छेदेनाभाववत्त्वमित्यर्थः । तत्तत्साध्यकेति गुणत्वाद्यवच्छिन्नसा-ध्यकद्रव्यत्वाद्यव्याप्तिवारणायेत्यर्थः तत् असमानाधिकरणान्तम् । अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तेरप्रसि-द्ध्या तद्घटितैव व्याप्तिः व्याप्यवृत्तिसाध्यके तु प्रतियोगिवैय-धिकरण्यानुपस्थितिदशायामपि हेतुसमानाधिकरणाभावप्रति-योगितावच्छेदकत्वसामान्याभावग्रहादनुमित्युत्पत्त्या प्रतियोगिवै-यधिकरण्याघटितापि व्याप्तिरस्ति प्रतियोगिवैयधिकरण्यघ-टितव्याप्तिरुभयत्रैव प्रसिद्धानुमितिप्रयोजिका चेत्याशयेन मूल-कृतस्तदुपादानमित्याह नोपादेयमिति । व्याप्यवृत्तिसाध्यके सा-र्वत्रिकमुपादानं प्रतिक्षिप्तं न त्वनुपादानस्य सार्वत्रिकत्वमुक्तं व्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वग्रहदशायां प्रतियोगिवै-यधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात् व्याप्यवृत्तिसा-ध्यके सर्वत्र तादृशविशेषणोपादानानियमः तदघटिताया अपि व्याप्तेः सर्वत्रानुमित्यौपयिकत्वात् अव्याप्यवृत्तिसाध्यके तु स-र्वत्र तदुपादाननियम एव तदघटितव्याप्तेरप्रसिद्धेरिति वार्थः व्याप्यवृत्तिसाध्यकत्वं च स्वसमानाधिकरणाभावाप्रतियोगिसा-ध्यकत्वं सत्तावान् द्रव्यत्वात् कालिकसम्बन्धावच्छिन्नाका-शाभावाभाववान् आत्मत्वादित्यादिकं च न तथा अतस्तत्र सा-ध्यवति कालात्मादौ कालिकदैशिकविशेषणताभ्यां तदभाव-सत्त्वात् प्रतियोगिवैयधिकरण्याविशेषितहेतुसमानाधिकरणाभा-वाप्रतियोगित्वस्य साध्ये ऽसत्त्वेन व्याप्तेः प्रतियोगिवैयधिक-रण्याघटितत्वनियमेऽपि न दोषः । केचित्तु व्याप्यवृत्तिसाध्यकत्वं यथाश्रुतमेव हेतुमत्यभावस्य न दैशिकविशेषणतया वृत्तिर्विवक्ष-णीया अतो हेतुमति कालादौ कालिकविशेषणतादिना साध्या-भावसत्त्वेऽपि नाव्याप्तिः भावस्यापि अभावत्वेन दैशिकविशेष-णतया वृत्तिः प्रामाणिकी अतो नाभावसाध्यकव्यभिचारिण्य-तिव्याप्तिः यादृशप्रतियोगितानिरूपकाभावत्वविशिष्टस्य दैशिकवि शेषणतया हेतुमति वृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान्

आत्मत्वादित्यादावव्याप्तेर्निरासः तत्राकाशाभावस्याकाशाभावत्वेनैव देशिकविशेषणतया आत्मनि वृत्तिर्न तु उक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन आत्मनि तादृशाभावाभावो नास्तीत्यप्रतीतेः अव्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान्नित्यगुणत्वादित्यादावनुत्यौपायिकद्विविधव्याप्तेः सम्भवेन सर्वथैवेत्युक्तं तावताप्यव्याप्यवृत्तिसाध्यकेऽपि क्वचित्तदघटितव्याप्तेः सम्भव इति सूचितमित्याहुः । यत्तु व्याप्यवृत्तिसाध्यके ऽव्याप्यवृत्तित्वग्रहाविषयसाध्यके सर्वथैवासमानाधिकरणान्तस्यानुपादेयतया तत्र लाघवेन प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानं तदसत् । तत्रापि शब्दादिना प्रतियोग्यसामानाधिकरण्यघटितव्याप्तेरेव यदा ग्रहस्तदा ऽनुमितेरुत्पादाय तादृशव्याप्तेरनुमानाङ्गत्वस्योपगन्तव्यत्वात् अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमः तादृशसाध्यके लाघवेन साध्याभाववदवृत्तित्वमात्रस्यैव व्याप्तित्वोपगमप्रसङ्गात् केवलान्वयिनो यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयता तत्साध्यके हेतुसामानाधिकरण्यविशेषणपरित्यागस्यापि प्रसङ्गाच्च । यत्तु प्रतियोग्यसामानाधिकरण्येत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमवश्यं वाच्यम् अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः तथा च स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन हेतुमदवृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानम् अनुमितिकारणं वाच्यं तादृशं च ज्ञानमसर्वज्ञस्य दुर्घटम् । अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमदवृत्तिरभाव एवानुगतरूपेण निवेश्यः सद्धेतौ सर्वेषामेव हेतुसमानाधिकरणाभावानां सर्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमदवृत्तित्वं न प्रसिद्ध्यतीति साध्याभावनिष्ठत्वं साध्यसामानाधिकरण्ये विशेषणं सद्धेतौ सर्वत्र साध्याभावभिन्नाभावे तत्प्रसिद्धिसम्भवः व्यभिचारिणि च व्यभिचारनिरूपकाधिकण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया

हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्तिः संयोगेन प्रमेयसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्ध्या हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावासिद्धिरिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेशनीयः एवं च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसामानाधिकरण्याप्रसिद्ध्या ईदृशव्याप्तिर्न प्रसिद्ध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्याघटितैव व्याप्तिरित्युक्तं नोपादेयं चेत्यादिनेति । तदपि न सामानाधिकरण्यविशेषणीभूतसाध्याभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशे प्रयोजनाभावाद्व्याप्यवृत्तिसाध्यकेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभाव एव साध्यसामानाधिकरण्यप्रसिद्ध्या तत्राप्युक्तव्याप्तिप्रसिद्धेः । परे तु ननु प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेरनुमितिप्रयोजकत्वे प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां तदसमानाधिकरण्याविषयकादेव हेतुसमानाधिकरणाभावाप्रतियोगित्वज्ञानादनुमितिरुपेयत इत्यनुपपन्नमत आह नोपादेयश्चेति । व्याप्यवृत्तिसाध्यके अनुमितिपूर्वमव्याप्यवृत्तित्वज्ञानाविषयसाध्यके सर्वत्र प्रतियोगिवैयधिकरण्यं नोपादेयम् । अनुमितिप्रयोजकव्याप्तिशरीरे न निवेशनीयं । तत्र तदघटितव्याप्तिज्ञानमेव हेतुः । सर्वथैवेत्यनेन यत्साध्यके कदाचिदनुमितिपूर्वं साध्ये हेतुमत्यव्याप्यवृत्तित्वज्ञानं तत्र तदनुमितिनिर्वाहाय प्रतियोग्यसामानाधिकरण्यमुपादायापि व्याप्तेरनुमितिप्रयोजकत्वमुपेयं वक्ष्यमाणरीत्या व्याप्तेरनुगमान्न व्यभिचार इति सूचितं । साध्यभेदेत्युपलक्षणं प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशाभेदेनैकसाध्यकेऽप्यनुमितिप्रयोजकव्याप्तिभेदोपगमोऽपि बोद्धव्य इतिव्याचक्रुः । व्याप्यवृत्तिसाध्यकस्थले द्विविधा व्याप्तिर्न त्वव्याप्यवृत्तिसाध्यके इति साध्यभेदेन व्याप्तिभेदाभावो न सम्भवतीत्यत आह साध्यादिभेदेनेति साध्यतावच्छेदकादेर्विशिष्य व्याप्तिघटकतया तद्भेदे तद्भेदस्यावश्यकत्वादित्यर्थः ॥

यद्यपि जात्यादौ गुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षितस्य सत्त्वादेर्व्याप्तिरस्त्येव गुणादौ तदुपलक्षितसत्त्वाद्यनुमितेः

प्रमात्वादिति तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सल्लिङ्गकपरामर्शादपि भ्रमः स्यादिति तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतोर्न स्वीकर्तुं शक्यते ऽतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्यन्तं निवेश्य तत्र तादृशातिव्याप्तिं वारयति प्रतियोग्यसामानाधिकरण्यं चेति ॥

(दी०) प्रतियोग्यसामानाधिकरण्यं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ नातिप्रसङ्गः । न चोभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलादन्यादिति तदभावो मनसि सहजत एव प्रतियोग्यसमानाधिकरण इति वाच्यम् उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावः तदवच्छिन्नाभावात । वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् । न च तत्र व्याप्तिरेवोभयत्वाधिकरणमूर्तत्वस्य मनसि सत्त्वादिति वाच्यं तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वान्नात्रोभयमिति प्रतीतेर्दुर्वारत्वात् ।

(गा०) न च तत्रापि व्याप्तिस्वीकारे क्षतिविरहः गुणो गुणान्यत्वविशिष्टसत्तावानित्यादौ तादृशव्याप्तिसत्त्वेऽपि बाधेनैव हेतोर्दुष्टत्वोपपत्तेः द्रव्यपक्षकतादृशसाध्यकजात्यादिहेतोश्च समीचीनताया एवोपगमे क्षतिविरहात् बाधानवतारदशायां च गुणादौ जात्यादिलिङ्गकविशिष्टवैशिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकसाल्लिङ्गकपरामर्शादपि स्वीक्रियते अत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधानवतारदशायां प्रमात्मकपरामर्शाद्विशिष्टानुयोगिकवैशिष्ट्यावगाहिनी भ्रमानुमितिर्मणिकारेणोपगम्यत इति वाच्यं भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयात्

गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या तत्र प्रमात्मकपरामर्शाद्भ्रमानुमितिस्वीकाराद्गुणो विशिष्टसत्तावान् जातिमत्त्वादिति विशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाववान् घटो गन्धवानित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमसिद्धिव्यभिचारासङ्कीर्णबाधोदाहरणत्वेनाभिहितवतो मणिकृतोऽप्युक्तस्थलेऽव्याप्तिर्नास्तीत्याशय उन्नीयते। अथ विशिष्टनिरूपित एव समवायादिर्विशेष्याविरोधिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे दण्डाद्युपलक्षितपुरुषादिमत्त्वविरोधिताद्दशपुरुषाद्यभावात्तदविरोधितद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहात् न च तदुपलक्षितपुरुषाद्यभावस्य स धर्मो न प्रतियोगितावच्छेदकः अपि तु प्रतियोगितासमानाधिकरण एव प्रतियोगितावच्छेदकस्यैव प्रतियोगिनि विशेषणत्वादताद्दशस्यैव चोपलक्षणत्वादिति ताद्दशाभावयोर्विशेष इति वाच्यम् उपलक्षणेन दण्डादिना व्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे तदवच्छेदकतायाः पर्याप्त्यसम्भवेन दण्डादेरपि तदवच्छेदककोटावश्यमन्तर्भावात् अत एव पुरुषादिमात्रेण दण्डाद्युपलक्षितपुरुषाद्यभावस्य न विरोधः तदवच्छिन्नाभावस्यैव तद्विशिष्टाभावत्वे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादौ ग्रन्थकृतां कूटघटितलक्षणातिव्याप्तिदानमपि विरुध्येत पृथिवीसमवेतत्वविशिष्टाभावस्य वाय्वादौ सत्त्वेन वायुत्वादेस्तत्र साध्ये सद्धेतुत्वात् तथा च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविवक्षायामपि नातिव्याप्तिः प्रतियोगितावच्छेदकसम्बन्धेन गुणादेर्विशिष्टसत्तानधिकरणत्वादिति चेन्न विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्वत्र न सम्भवतीति प्रागुक्तत्वात् अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादिरूपावच्छेदकोपलक्षितविशेष्य एव पर्याप्तेत्युपगम्य तयोर्विशेषस्योपपादनीयत्वात् विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः सहजत एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यकानुसरणम्

नातिप्रसङ्ग इति हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामानाधिकरण्येपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहेण न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यर्थः व्याप्यवृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमितिहेतुतया उक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः ।

ननु मूर्तत्वादिहेतौ भूतत्वादिविशिष्टमूर्तत्वत्वादिरूपतदुभयत्वावच्छिन्नस्यैव व्याप्तिर्न तु तदुभयवृत्तिबुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्य तथा च विशिष्टसत्तातिरिक्ततामते विशिष्टसत्तादिसाध्यकजात्यादिहेताविव उक्तोभयसाध्यकमूर्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षे नातिव्याप्तिप्रसक्तिरित्याभिमानं न चेत्यादिना निराकरोति न चेति ।

सहजत एव प्रतियोगिपदस्य तत्त्वावच्छेदकविशिष्टपरतां विनैव उभयत्वम् उभयव्यवहारविषयतावच्छेदकं न विशिष्टत्वात् एकविशिष्टापरत्वात् अनतिरिक्तम् अभिन्नम् अतिरिक्तमित्यनुक्त्वा नानतिरिक्तमित्यभिधानम् । उभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभाय नञ्पदस्यानुयोगितावच्छेदकावच्छेदेनाभावबोधकत्वव्युत्पत्तेः तावता एकविशिष्टापरत्वमुभयनिष्ठव्यासज्यवृत्तिधर्मश्च उभयपदार्थतावच्छेदकमस्तु न तन्मात्रं वक्ष्यमाणानुपपत्तेः प्रकृते च उभयत्वमेकविशिष्टापरत्वमेवेति शङ्काव्युदासः । अत्र हेतुः वैशिष्ट्यविरहेपि घटत्वपटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति घटत्वपटत्वयोः सामानाधिकरण्यविरहेपि तत्रोभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः । यद्यपि घटत्वपटत्वोभयमितिप्रतीतौ कालिकसम्बन्धघटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवः तथापि वाच्यत्वघटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेण उभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयताया अभ्युपगन्तव्यतया घटत्वपटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्यासज्यवृत्तिधर्म एव विषय इति भावः । तथा च तदनुरोधेन व्यासज्यवृत्तिधर्मविशेषस्य उभयव्यवहारविषयताया आवश्यकत्वे एकविशिष्टापरत्वस्य तथाव्यवहारविषयत्वमप्रामाणिकमिति न भूतत्वमूर्तत्वोभय-

वान् मूर्तत्वादित्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्व-प्रसक्तिस्तथा सत्यनुमितेरुभयवानित्याकारकतानुपपत्तेरिति नि-र्व्यूढम्। ननु मूर्तत्वाधिकरणे मनसि भूतत्वमूर्तत्वोभयं नास्तीति बुद्धेरेकविशिष्टपराभावावलम्बनेनैवोपपत्तिः मनसि प्रतियोगि सत्त्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्त्वादिति क्वचिदेकविशिष्टा-परत्वस्यापि उभयव्यवहारविषयतावच्छेदकत्वमावश्यकमित्यत आह नवेति। तदवच्छिन्नाभावः प्रत्येकाधिकरणवृत्तिरुभयव्यवहार-विषयतावच्छेदकावच्छिन्नाभावः तदवच्छिन्नाभावात् एकविशिष्टा-परत्वावच्छिन्नाभावात् नानतिरिक्त इति विपरिणतेन सम्बन्धः प्रतियोगितावच्छेदकविशिष्टेनैव प्रतियोगिना ऽभावस्य विरोधादे-कस्याधिकरणेपि व्यासज्यवृतिधर्मावच्छिन्नाभावसत्त्वे बाधका-भावात् इति भावः। एतेन मूर्तत्वस्य व्यासज्यवृत्त्युभयत्वावच्छिन्न-व्यभिचारितापि व्यवस्थापिता आवश्यकश्च एकाधिकरणे व्या-सज्यवृत्तिधर्मावच्छिन्नतदभावः अन्यथा समवायघटितसामानाधि-करण्येन घटत्वादिविशिष्टपटत्वाद्यप्रसिद्ध्या घटादौ समवायेन घटत्व-पटत्वोभयं नास्तीतिप्रतीतेरनुपपत्तेस्तत्र समवायिसमवेतत्वरूपवैशि-ष्ट्यावच्छिन्नाभावस्यैव विषयतायाः स्वीकरणीयत्वात्। अन्यथा ए-ककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्य घटत्वादेः समवायेन घटादौ सत्त्वेन तादृशप्रतीत्यनिर्वाहादित्याह वैशिष्ट्यविरहेपि घटत्वपटत्वयो रुभयत्वेनाभावस्य प्रत्यक्षसिद्धत्वादिति। ननु तथापि व्यासज्य-वृत्तिनिरुक्तोभयत्वेन साध्यत्वे न मूर्तत्वस्य व्यभिचारिता सम्भवति एकप्रतियोगिमत्यपि अभावस्य प्रतियोगिसमानाधिकरणतया मूर्त-त्वाधिकरणे मनसि उभयाभावस्य प्रतियोगिव्यधिकरणत्वाभा-वात् हेतुमति प्रतियोगिव्यधिकरणस्यैव साध्याभावस्य व्यभिचार-त्वात् व्यभिचारलक्षणेपि प्रतियोगितावच्छेदकावच्छिन्नवैयधि-करण्यपर्यन्तस्यानिवेशादित्याशङ्कां निरस्यति न च तत्रेत्यादिना व्याप्तिरेव व्याप्तिरिष्टैव तथात्वेपीति मूर्तत्वस्य मनसि सत्त्वेपीत्य-र्थः। उभयत्वेनेति उभयत्वविशिष्टवत्ताया मनस्यसत्त्वादित्यर्थः। तथा च तत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमतया तत्प्रयो-जकहेतोर्न सद्धेतुत्वस्वीकारसम्भवः अत एव व्यभिचारलक्षणेपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तमेव निवेश्यमि-

ति भावः । एकाधिकरणे उभयत्वविशिष्टासत्त्वे मानमाह नात्रोभयमितीति । अत्रोभयमिति प्रतीत्यभावो न हेतुतयोक्तः उभयत्वेनैकस्य सत्त्वोपगमेऽपि उभयत्राधिकरणवृत्तितायास्तादृशप्रतीतिविषयतया एकस्मिन्नधिकरणवृत्तित्वाभावेन तादृशप्रतीतेर्भ्रमत्वस्यावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः ।

ननु प्रतियोग्यसामानाधिकरण्यस्याभावविशेषणत्वे लक्षणेऽत्यन्तपदवैयर्थ्यं धूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वेनैव साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकताया अकिञ्चित्करत्वात् इत्याशङ्क्या साम्प्रदायिकोपदर्शितमत्यन्तपदप्रयोजनमाह अत्यन्तपदं चेति ।

(दी०) अत्यन्तपदं चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यात्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तराभिन्नत्वात्तद्भेदस्य च स्वस्वरूपानतिरिक्ततया प्रतियोग्यसामानाधिकरण्यस्यैव दुर्लभत्वापत्तेः । सर्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणात्यन्ताभावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वात् अभावसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः ।

(गा०) अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येति लाभायेत्यग्रिमेणान्वयः स्वं यस्य प्रतियोगिनो ऽत्यन्ताभावस्तादृशप्रतियोग्यसामानाधिकरण्यपर्यन्तस्याभावविशेषणत्वलाभायेत्यर्थः अत्यन्ताभावत्वनिरूपकप्रतियोगिताया इति प्रतियोगितानवच्छेदकेत्यत्र या प्रतियोगिता निविष्टा तत्रात्यन्ताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्य लाभायेत्यर्थः । क्रमेण व्यावृत्तिमाह अन्यथेति सर्वस्यैवाभावस्येति हेतुसमानाधिकरणाभावत्वेनोपादेयस्य सर्वस्य गोत्वाद्यभावस्येत्यर्थः स्वसमानाधिकरणाभावान्तरभिन्नत्वात् स्वं यस्य समानाधिकरणं तादृशघटत्वाभावभेदवत्त्वादित्यर्थः । स्वरूपानतिरिक्तत्वात् गोत्वाद्यभावरूपाधिकरणस्वरूपत्वादभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकर

णीभूताभावस्वरूपतेति सिद्धान्तादिति भावः । प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति । गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेपि स्वनिष्ठभेदत्वानिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः । न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमिति वाच्यं तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात् भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपत्वाङ्गीकारात् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यतास्थले तन्मतेऽभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वस्य निवेश्यत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशेऽपि तत्रैव तदप्रसिद्धिर्द्रष्टव्या। अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेपि सर्वेषामेवाभावानां किञ्चिद्विशिष्टस्वाभावादिरूपात्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यनियमात् तदसमानाधिकरणाभावाप्रसिद्धेः । यादृशप्रतियोगितेत्यादिना वक्ष्यमाणरीतेरनुसरणे प्रतियोगिन्यत्यन्ताभावत्वनिरूपकत्वनिवेशवैयर्थ्यमत्रास्वरसबीजमेव । हेतुसमानाधिकरणेति । हेतुसमानाधिकरणस्य भेदत्वनिरूपकाभावान्तररूपप्रतियोगिसमानाधिकरणत्वेपि विवक्षितात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठस्वभेदाकस्य तस्य प्रतियोगित्वादित्यर्थः । अभावसाध्यकेति घटत्वाभावादिसाध्यकपटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेपि सम्बन्धान्तरावच्छिन्नसाध्याभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावाच्छिन्नत्वनिवेशऔव्ये एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं निवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेपि सर्वेष्वेवाभावेषु उक्तरीत्याऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यापि सत्त्वेन प्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैव निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्य सद्धेत्वधिकरणवृत्तित्वविशिष्टाभावे ऽसत्त्वेनाव्याप्त्यप्रसक्तिरित्यस्वरसबीजम् ॥

सम्प्रदायानुमतात्यन्ताभावत्वानिरूपकप्रतियोगितानिवेशपक्षेऽतिव्याप्तिमाशङ्कते अथेत्यादिना ।

(दी०) अथ यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात् । संसर्गाभावमात्रोक्तावपि यदा स्पन्दः तदा द्व्यणुकं यदादृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्यादृष्टं तदा तदीयं ज्ञानमित्यादावतिव्याप्तिः । द्व्यणुकत्वादेर्द्व्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात् । न हि तयोः सामान्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये तत्सामान्यावच्छिन्नध्वंसप्रागभावयोः सम्भव इति चेन्न प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात् । अन्यथात्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गात् । इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वात । तच्छून्ये च काले तदभावस्य प्रतियोग्यसमानाधिकरणत्वात् ।

(गा०) यदा गोत्वमिति कालिकसम्बन्धेन गोगोत्वयोर्हेतुसाध्यत्वलाभाय गोमानयं गोत्वादिति प्रतिज्ञाहेतू अनभिधाय कालिकसम्बन्धावच्छिन्नवृत्तिबोधकदाप्रत्ययघटितोदाहरणाभिधानमेवमग्रेऽपि । प्रलयस्येति व्यभिचारनिरूपकहेत्वधिकरणस्येत्यादिः ध्वंसवत्त्वेनात्यन्ताभावानधिकरणत्वादिति प्राचामनुमतं ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमादृत्य एतदेवाग्रे निराकृत्य समाधेयम् । अथ कालिकसम्बन्धेन ध्वंसादिमत्यपि कालेऽत्यन्ताभाववृत्तावविरोधः महाकालादौ समवायादिसम्बन्धेन रूपात्यन्ताभावस्य सर्वानुमतत्वात् न च कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य तत्सम्बन्धावच्छिन्नगोध्वंसात्यन्ताभावरूपताया अत्यन्ताभावस्य त्रितयप्रातियोगिकत्वमङ्गीकुर्वाणैः प्रा-

चीनैरुपगमात् कालिकसम्बन्धरूपप्रतियोगितावच्छेदकसम्बन्धेन गोध्वंसवति तत्सम्बन्धावच्छिन्नगवाभाववृत्तिर्न तेषामनुमतेति वाच्यम्। एवमपि कालिकसम्बन्धेन प्रतियोगिमत्यपि तेन सम्बन्धेनात्यन्ताभावस्य कालिकसम्बन्धेन वृत्तावविरोधात् तेन सम्बन्धेन प्रलये वर्तमानमत्यन्ताभावमादायातिव्याप्तिवारणसम्भवात् अभावस्य सम्बन्धविशेषनिवेशे प्रयोजनाभावात् न च प्रतियोग्यसामानाधिकरण्येनाघटितापि व्याप्तिरनुमित्यौपयिकी तद्विशेषणानुपस्थितिदशायामप्यनुमितेरानुभाविकतायाः वक्ष्यमाणत्वात्। तत्र चाभावस्य सम्बन्धविशेषोऽवश्यं प्रवेश्यः अन्यथा हेतुमति कालिकादिसम्बन्धेन वर्तमानं साध्याभावमादायाव्याप्तेरिति तादृशव्याप्तेरेवोक्तस्थले प्रमात्वप्रसङ्गपरोऽयं ग्रन्थ इति वाच्यं यत्र हेतुमति साध्याभावः कालिकसम्बन्धेन वर्तते तत्र प्रतियोग्यसामानाधिकरण्यघटितव्याप्त्यैव सद्धेतुतानिर्वाहात् प्रतियोग्यसामानाधिकरण्यागर्भव्याप्तिग्रहस्य तत्र भ्रमत्वोपगमे क्षतिविरहात्तादृशव्याप्तावप्यभावस्य सम्बन्धविशेषाप्रवेशात्। मैवं प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां सत्तावान् द्रव्यत्वादित्यादावप्यभ्रान्तस्यानुमितिरनुभवसिद्धा तदनुरोधेन भावसाध्यके दैशिकविशेषणताविशेषेण हेतुमद्वृत्तित्वगर्भाया अपि व्याप्तेरनुमितिप्रयोजकता वाच्या तथा सति तादृशव्याप्तिप्रमामादायोक्तस्थले ऽनुमितिप्रसङ्गपरतया एतद्ग्रन्थस्य सामञ्जस्यात् न च प्रतियोग्यसामानाधिकरण्यघटितव्याप्तावभावस्य सम्बन्धविशेषानिवेशादभावीयसम्बन्धविशेषागर्भप्रतियोग्यसामानाधिकरण्यगर्भ-व्यभिचारग्रहविरोधित्वेनैव प्रतियोग्यसामानाधिकरण्यगर्भतदगर्भव्याप्ती अनुगमय्य तयोरेवानुमित्यौपयिकतायाः वक्तव्यतया ऽभावीयसम्बन्धविशेषघटितव्याप्तिग्रहस्य तादृशव्यभिचारग्रहाप्रतिबन्धकतया तादृशव्याप्तेर्नानुमित्युपयोगितानिर्वाह इति वाच्यं तादृशव्याप्तिसंग्रहायैवाभावीयसम्बन्धविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्यभिचारग्रहविरोधित्वेन व्याप्तीनामनुगमनीयत्वात् तावताप्यभावीयसम्बन्धविशेषाघटितप्रतियोग्यसामानाधिकरण्याघटितव्याप्तेः संग्रहसम्भवात् एवं सत्यव्यावर्तकाभावीयसम्बन्धघटितप्रतियोग्यसामानाधिकरण्यघटि-

तव्याप्तिज्ञानादपि अनुमितिः स्यादितिचेत् । इष्टमेवैतत् एवं सति प्रतियोग्यसामानाधिकरण्यभर्माभावीयसम्बन्धविशेषघटित-व्याप्तिप्रमातोऽप्युक्तस्थले ऽनुमितिप्रसङ्गो दुर्वार इति चेत् का-क्षतिरस्माकम् । वस्तुतस्तु दीधितिकृता स्वयं निष्कर्षणीयहेतुमति प्रतियोग्यनधिकरणत्वनिवेशकल्पे प्रतियोगिव्यधिकरणत्वघ-टितव्याप्तावभावीयसम्बन्धविशेषनिवेशस्य निष्प्रयोजनत्वेपि प्र-तियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेतुमद्वृत्तितागर्भयथाश्रुत-व्याप्तौ तदीयसम्बन्धविशेषनिवेशनमावश्यकम् । अन्यथा संयोगी द्रव्यत्वादित्यादौ प्रतियोग्यनधिकरणगुणादिवृत्तित्वविशिष्टस्यापि संयोगाद्यभावस्य कालिकसम्बन्धेन हेत्वधिकरणकालवृत्तितया अव्याप्तिप्रसङ्गात् एकसम्बन्धेन एकाधिकरणवृत्तित्वविशिष्टस्या-न्यसम्बन्धेनाधिकरणान्तरवृत्तित्वात् प्रतियोगिसामानाधिकर-ण्याभावनिवेशकल्पेपि गुणादौ तद्विशिष्टस्य संयोगाद्यभावस्य का-लिकसम्बन्धेन कालवृत्तित्वात् तत्कल्पेप्यव्याप्तेरावश्यकत्वात् न च प्रतियोगिसामानाधिकरण्यविशिष्टस्य तस्य कालवृत्तित्वे प्रतियोगि-सामानाधिकरण्याभावविशिष्टस्य न तद्वृत्तित्वसम्भवः भावाभाव-विशिष्टस्य एकाधिकरणवृतित्वे प्रतियोगिसामानाधिकरण्याभाववि-शिष्टसंयोगाद्यभावस्यैव दैशिकविशेषणतयापि द्रव्यवृत्तित्वप्रसङ्गा-दिति वाच्यं विरोधिनोर्भावाभावयोः कालिकसम्बन्धेनैकाधिकरण-वृत्तितावत् भावाभावविशिष्टस्यापि कालिकसम्बन्धेन एकत्र वृत्तौ विरोधाभावात् । यद्यपि अभावस्य दैशिकविशेषणतासम्बन्धानिवेशे ऽभावसाध्यके व्यभिचारिणि भावस्य देशिकविशेषणतानभ्युप-गमे ऽतिव्याप्त्या साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनि-वेशो समवायसम्बन्धावच्छिन्नजात्यभावसाध्यके जातित्वादिहे-तावव्याप्तिर्जात्यादिरूपहेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः तथापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धातिरिक्तसम्ब-न्धेन या साध्याभावस्य वृत्तिस्तदन्यहेतुमद्वृत्तेः प्रकृतप्रतियो-गितानिरूपितानुयोगितावच्छेदकसम्बन्धेन हेतुमति वृत्तेर्वा ऽभा-वविशेषणत्वोपगमान्न दोषः उक्तस्थले हेतुमति काले कालविशे-षवृत्तित्वविशिष्टानित्यस्यात्यन्ताभावस्य प्रसिद्ध्यातिव्याप्तिसङ्गतिः । अत्यन्ताभावत्वघटकानित्यत्वांशं परित्यज्य ध्वंससाधारणसंस-

र्गाभावत्वानिवेशे महाप्रलये गोत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसोपगन्तृमते ध्वंसमादायोक्तस्थलातिव्याप्तिःशक्यते वारयितुमित्याशङ्क्याह संसर्गाभावेति। दैशिकविशेषणतयापि ध्वंसस्य कालवृत्तित्वमित्याशयेनोक्तशङ्कासङ्गतिः अन्यथा ऽभावस्य तादृशसम्बन्धेन वृत्तिनिवेशे ऽत्यन्ताभावमिव ध्वंसमादायातिव्याप्तेर्दुर्वारत्वात् न च प्रतियोग्यधिकरणमहाकाले गोध्वंसस्य दैशिकविशेषणतासत्त्वेपि प्रतियोग्यनधिकरणप्रलये तस्य तादृशसम्बन्धो ऽप्रामाणिक इति वाच्यं यदुपाधिविशिष्टस्य प्रतियोग्यधिकरणत्वं तदन्योपाधिविशिष्टस्यैव महाकालस्य तदभावाधिकरणतया महाकालस्य दैशिकविशेषणतया ध्वंसवत्त्वे प्रलयात्मकोपाधेरपि तादृशसम्बन्धेन तदाधारताया आवश्यकत्वात् अन्यथा प्रलये गौर्नास्तीति व्यवहारानुपपत्तेः। अथवा निष्कर्षणीयप्रतियोगिवैयधिकरण्यकल्पाभिप्रायेणेदं तत्कल्पे प्रयोजनाभावादभावे वृत्तिविशेषानिवेशात्। न चाभावे वृत्तिविशेषानिवेशे कालिकसम्बन्धेन गवात्यन्ताभावस्यापि प्रलयवृत्तेः संसर्गाभावमात्रपरत्वोक्तिविरोध इति वाच्यं प्रतियोगितावच्छेदककालिकसम्बन्धेन तत्प्रतियोगिनो ध्वंसस्य हेत्वधिकरणे ऽबाधात् गवात्यन्ताभावस्य प्रतियोगिव्यधिकरणत्वाभावात् ध्वंसस्य तत्प्रतियोगिनो ऽत्यन्ताभावस्य प्रतियोगितावच्छेदकदैशिकविशेषणतासम्बन्धेन काले ऽसत्त्वात् प्रतियोगिवैयधिकरण्यमक्षतमेव। यदा स्पन्द इति। अत्र च व्यभिचारनिरूपकाधिकरणं खण्डप्रलयो जन्यद्रव्यानधिकरणे तस्मिन् द्व्यणुकासत्त्वात् पुनर्द्व्यणुकोत्पत्त्यनुरोधेन परमाणूनां स्पन्दस्वीकारस्यावश्यकत्वात् तथा च हेत्वधिकरणे तत्र द्व्यणुकसामान्यध्वंसप्रागभावयोरसत्त्वादतिव्याप्तिरिति भावः। द्व्यणुकनाशानुगुणक्रियाया उत्तरसंयोगनाश्याया अधिकरणे चरमपरमाणुसंयोगनाशरूपमहाप्रलयपूर्वतृतीयक्षणे द्व्यणुकसामान्यध्वंससत्त्वादत्राप्यतिव्याप्तिर्न विचारसहेत्यतो यदादृष्टमिति। ज्ञानत्वमात्रेण साध्यतायां प्रलये ईश्वरीयज्ञानसत्त्वादयं सद्धेतुरेवेत्यतो जन्यमिति। नित्यसुखाभिव्यक्तिर्मुक्तिरिति मते खण्डप्रलयेपि मुक्तात्मनि जन्यज्ञानसत्त्वात् सद्धेतुत्वं सम्भवतीति अतो दुःखं वेति। जन्यमात्रं प्रत्यदृष्टस्य हेतुतया महाप्रलयाव्यवहितप्राक्क्ष-

णेऽपि तज्जनकीभूतादृष्टस्याऽऽवश्यकत्वमिति तदा जन्यज्ञानत्व-
सुखदुःखत्वाद्यवच्छिन्नध्वंससत्त्वान्नोपदर्शितस्थलयोरतिव्याप्तिः स-
म्भवतीत्यतः स्थलान्तरमाह यदा तस्येति । यदात्मसमवेतादृष्टं न
प्रलयजनकं स तत्पदेन विवक्षितः । व्यभिचारश्चाऽत्र खण्डप्रलये सुषु-
प्त्यादौ च बोध्यः । खण्डप्रलयनिष्ठद्व्यणुकादिध्वंसस्य द्व्यणुकत्वादिरू-
पसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वासम्भवं व्युत्पादयति नहीति
ति । तयोः ध्वंसप्रागभावयोः । सामान्याभावत्वमतेपि सामान्यधर्मा-
वच्छिन्नप्रतियोगिताकत्वमतेपि ध्वंसप्रागभावयोरत्यन्ताभावाविरो-
धित्वमते न तयोस्तथात्वमित्येतत्सूचयितुं मतेपीति । एकविशेषेति ।
एकविशेषप्रागभाववति न सामान्यावच्छिन्नध्वंसस्य विशेषान्तर-
ध्वंसवति न सामान्यधर्मावच्छिन्नप्रागभावस्य संभव इत्यर्थः
अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतया तत्कालीनध्वंसादि-
प्रतियोगिताशून्यानागतादिपदार्थसाधारणस्य तादृशप्रतियो-
गितावच्छेदकत्वासंभवादिति भावः । यद्यप्येवं महाप्रलयवृत्त-
योपि गोध्वंसाः प्रत्येकमेकैकगोव्यक्तिमात्रवृत्तिप्रतियोगिता-
का इति न कस्यापि ध्वंसस्य प्रतियोगितायाः समनियतं
गोत्वं तथापि चरमध्वंसस्य यावद्गोप्रतियोगिकत्वोपगमे त-
त्प्रतियोगितावच्छेदकत्वं गोत्वस्य संभवतीत्यभिप्रायेण संस-
र्गाभावत्वनिवेशे पूर्वोक्तस्थलमुपेक्ष्य द्व्यणुकादिसाध्यकस्पन्दादि-
हेतुकस्थले ऽतिव्याप्तिरभिहिता । वस्तुतस्तु ध्वंसप्रागभा-
वयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चरमगोध्वंसस्यापि यावद्गो-
प्रतियोगिकत्वं न संभवतीति ध्येयम् । विरोधिनः प्रतियोगि-
नो ऽधिकरणे काले एव चेदभावो वर्तते तदा सुतरां ध्वं-
सप्रागभाववति काले प्रलयादावसौ वर्तत इति सूचनाय
प्रतियोगिमत इवेति दृष्टान्तः । विरोधाभावात् बाधकाभावात्
तथा च हेत्वधिकरणे प्रलयादौ गोत्वाद्यवच्छिन्नाभावसत्त्वान्नोक्त-
स्थले ऽतिव्याप्तिरिति भावः । न च प्रलये गोत्वाद्यवच्छिन्नाभा-
वो ऽप्रामाणिकः प्रत्यक्षायोगादनुमानस्याऽप्रयोजकत्वादिति वा-
च्यं प्रलये गौर्नास्तीति शब्दस्यैव प्रमाणत्वात् न हि तादृ-
शवाक्यस्याप्रामाण्यं कश्चिदुपैति न च ध्वंसादिरेव तत्र न-
ञर्थो नात्यन्ताभाव इति वाच्यम् अन्वयितावच्छेदकसमानाधिकर-

णप्रतियोगिताकाभावमात्रस्य नञा प्रतिपादनेऽतिप्रसङ्गात्तदवच्छिन्नप्रतियोगिताकाभावबोधकताया एव तस्य व्युत्पन्नतयाऽत्यन्ताभावमात्रस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमते ध्वंसादेर्नञा प्रतिपादनासम्भवात् । अन्यथा—प्रतियोगिमति तद्ध्वंसप्रागभाववति च काले कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यात्यंताभावस्यावृत्तौ अत्यन्ताभावस्य तादृशात्यन्ताभावस्य । कालमात्रावृत्तित्वेति दैशिकविशेषणतयेत्यादिः । ननु ध्वंसप्रागभाववति अत्यन्ताभाववृत्तौ तस्य तदविरोधितावत् प्रतियोगिमति तद्वृत्त्या तस्य प्रतियोग्यविरोधिताप्यापद्येताविशेषादित्यत आह इयांस्त्विति । एकस्य प्रतियोगिमतः कालस्य । देशभेदावच्छिन्नम् प्रतियोग्यनवच्छेदकदेशावच्छिन्नम्। तथात्वम् दैशिकविशेषणतासम्बन्धेन कालिकसम्बन्धावच्छिन्नात्यन्ताभाववत्त्वं तथा च प्रतियोग्यभावयोरेकावच्छेदेन एकत्रावर्तमानत्वरूपविरोधित्वं तावताप्यक्षतमेवेति भावः । अपरस्य ध्वंसादिमतः । स्वरूपावच्छिन्नम् ध्वंसाद्यधिकरणतावच्छेदकरूपावच्छिन्नम् तथात्वमित्यनुषज्यते । तथा च एकावच्छेदेन एकत्र वर्तमानतया ध्वंसाद्यविरोधित्वमत्यन्ताभावस्येति भावः । ननु काले वृत्तौ देशस्यावच्छेदकत्वे किं मानमत आह देशे कालस्येवेति यथा देशे दैशिकसम्बन्धावच्छिन्नाभावस्य वृत्तौ कालस्यावच्छेदकत्वमिदानीमत्र गौर्नास्तीत्यादिप्रतीतिबलात् तथा कालिकसम्बन्धावच्छिन्नाभावस्य वृत्तावपि देशविशेषस्यावच्छेदकत्वं तथाविधप्रतीतिबलादेव तादृशप्रतीतेः कालावच्छेदेन देशवृत्तिर्देशावच्छेदेन कालवृत्तिर्वा विषय इत्यत्र विनिगमकाभावात् अवच्छेदकत्वाधिकरणत्वयोरेव सप्तम्यर्थत्वादितिभावः । प्रतियोगिमत्यपि काले गवात्यन्ताभावस्य वृत्तौ तस्यासमानाधिकरणान्तेन वारणात् कथं तमादायोक्तातिव्याप्तिर्वार्येत इत्यत आह तच्छून्येति । प्रतियोगिशून्ये प्रलयादावित्यर्थः तदभावस्य—गवात्यन्ताभावस्य । प्रतियोगिव्यधिकरणत्वात् प्रतियोगिसामानाधिकरण्याभाववत्त्वात्। सामानाधिकरण्यस्याव्याप्यवृत्तितामत एव प्रतियोगिसामानाधिकरण्याभावस्याऽभावविशेषणत्वात् अन्यथा संयोगी सत्त्वादित्यादावतिव्याप्तिः तस्य व्याप्यवृत्तितापक्षे च प्रतियोग्यनधिकरणवृत्तित्वस्यैव निवेशनीयतया प्रलयादिवृत्तिगवात्यन्ताभावस्यान्यत्र प्रतियोगि-

समानाधिकरणत्वेपि लक्षणघटकत्वाव्याघातादिति भावः ।

संसर्गाभावत्वतद्घटितात्यन्ताभावत्वयोर्व्याप्तिघटितत्वेनानवस्थामाशङ्कते न चेति ।

(दी०) न च संसर्गाभावविशेषोऽत्यन्ताभावः । संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितमिति वाच्यम् । तद्वदन्यावृत्तित्वरूपानियमस्य तत्र घटकत्वात् । एवं नियमान्तरस्यात्र प्रवेशेऽपि न क्षतिः वक्ष्यते च नियमाघटितमपि संसर्गाभावादिलक्षणमनुपदमेव च विवेचयिष्यते संसर्गाभावत्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च ।

(गा०) संसर्गाभावविशेषः सदातनसंसर्गाभावः । संसर्गारोपः तादात्म्यातिरिक्तसम्बन्धेन प्रतियोग्यारोपः । तद्वदन्यावृत्तित्वेति । स्वाव्यवहितपूर्वक्षणावच्छेदेन तद्वतोऽन्यस्मिन् वर्तते यत्तदन्यत्वेत्यर्थः । तत्र जन्यत्वे । षष्ठ्यर्थे सप्तमी । नियमान्तरस्य विशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वरूपसम्बन्धत्वघटकनियमस्य । अत्र संसर्गाभावत्वशरीरे । न क्षतिरिति । तद्वदन्यावृत्तित्वरूपानियमस्यैव तत्र प्रवेशनीयत्वादितिभावः । स्वमते नियमानन्तर्भावस्यानुपदं वक्ष्यमाणत्वादाहुरित्युक्तम् । नियमाघटितमिति । आरोपस्याभावबुद्धिहेतुताया निर्युक्तिकत्वात्तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वस्यैव संसर्गाभावत्वरूपत्वादितिभावः । प्रयोजनविरह इति । साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य निवेशनीयतया ऽन्योन्याभावत्वादिनिरूपकप्रतियोगितामादाय दोषाप्रसक्तेरितिभावः । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यानिवेशकल्पमभिप्रेत्याह अव्याप्तिश्चेति । तन्मते सम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया एव निवेशनीयतया तादात्म्यसम्बन्धेन यत्र साध्यता तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नसंसर्गाभावप्रतियोगित्वाप्रसिद्ध्या ऽव्याप्तिरप्यापद्यत इत्यर्थः ।

(दी०) अथ ज्ञानवान् द्रव्यत्वात् विशेषगुणवान् मनोन्यद्रव्यत्वात जातिमान् भावत्वादित्यादावतिव्याप्तिः साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादिति चेत्। मैवम्। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तत्सम्बन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात्। भवति चैवमन्योन्याभावोपि प्रतियोग्यसमानाधिकरणः। तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः। तद्वद्वृत्तिभिन्नत्वं तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसङ्गात्।

(गा०) ननु विषयताया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्ये सम्बन्धित्वानिवेशपक्षे नातिव्याप्तिरित्यत आह विशेषेति। दिगुपाधीनां देशे वृत्तावच्छेदकत्वमेव न त्वधिकरणत्वमिति मते मनसो मूर्त्तत्वेपि न दैशिकविशेषणतया ऽधिकरणत्वमिति द्रव्यत्वमात्रस्य हेतुत्वे मनोरूपहेत्वधिकरण एव साध्याभावः प्रतियोगिव्यधिकरण इति नातिव्याप्तिसम्भव इत्यतो मनोन्येति। दिक्कालौ नेश्वरादातिरिच्येते इति मते सद्धेतुरेवेत्यतः स्थलान्तरे तामाह जातीति। साध्यशून्यानामपीति। साध्यतावच्छेदकसम्बन्धेनेत्यादिः। एवं–अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे। अन्योन्याभावोपीति। तथा च न तादात्म्यसम्बन्धेन साध्यतायामव्याप्तिरिति भावः। तद्विशिष्टस्य प्रतियोग्यसामानाधिकरण्यावच्छिन्नस्य। तेनेति। कपिसंयोगवान् एतद्वृक्षत्वादित्यादौ कपिसंयोगाभावरूपसाध्याभावस्य गुणादौ प्रतियोगिसामानाधिकरण्याभाववत्त्वेपि हेत्वधिकरणीभूतवृक्षादेर्न कपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभाववत्त्वं यत्र सामानाधिकरण्यविशिष्टवत्त्वं तत्र तदभावविशिष्टाधिकरणत्वाप्रत्ययात् अतः साध्याभावो न लक्षणघटक इति नाव्याप्तिरिति भावः। हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावनिवेशनेनाव्याप्तिवारणस्य सुकरत्वेपि मूलोपात्तहेतुसामानाधिकरण्यांशनिवेशवैयर्थ्यभिया न

तथा विवक्षितम् । सार्वभौमेनाहतं प्रतियोग्यसामानाधिकरण्यघटकीभूताधिकरणावच्छिन्नहेतुसामानाधिकरण्यस्याऽभावविशेषणत्वमुपेक्ष्य उपाध्यायमते प्रतियोग्यसमानाधिकरणत्वरूपविशेषणवैशिष्ट्यावच्छेदेन हेतुसामानाधिकरण्यरूपविशेषणवैशिष्ट्यनिवेशन एव लाघवमित्यालोच्य तदनुयायिना दीधितिकारेण प्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यं निवेशितं यथाश्रुतमूललभ्यो ऽयमेवार्थः प्रतियोग्यसामानाधिकरण्यहेतुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्य विवक्षितत्वादुद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छेदकभावलाभस्य च व्युत्पत्तिसिद्धत्वात् । प्रतियोग्यसामानाधिकरण्यस्य हेतुसामानाधिकरण्यावच्छेदकत्वे प्रतियोग्यसामानाधिकरण्यरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेः सत्त्वादिव्याप्यत्वप्रसंगः सत्त्वादिसामानाधिकरण्यावच्छेदकरूपवत्त्वस्य सत्त्वादिव्याप्तित्वादिति सार्वभौमोक्तदूषणमेतन्मते निरवकाशं तादृशव्याप्तावनेन पारिभाषिकस्यैवावच्छेदकत्वस्य विवक्षितत्वात् अन्यथा विषयितासम्बन्धेन घटत्वावच्छिन्नस्य ज्ञानत्वादिव्याप्यताया दुर्वारत्वात् तादृशसम्बन्धेन ज्ञानत्वादिसामानाधिकरण्ये ज्ञानविषयतारूपे घटत्वादेरवछेदकत्वात् । नन्वव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय प्रतियोगिसमानाधिकरणभिन्नत्वरूपप्रतियोग्यसमानाधिकरणत्वमेव निवेश्यतां किमुक्तविवक्षया गुणादौ प्रतियोगिसामानाधिकरण्याभाववतोऽपि कपिसंयोगाभावादेः प्रतियोगिसमानाधिकरणभिन्नत्वविरहात् भेदस्याव्याप्यवृत्तित्वानुपगमादित्यत आह तद्वद्वृत्तीति । प्रतियोगिमद्वृत्तीत्यर्थः नार्थः न प्रतियोग्यसमानाधिकरणपदेन विवक्षितः । अव्याप्यवृत्तीति । कपिसंयोगी सत्त्वादित्यादावित्यर्थः । अतिप्रसङ्गादिति । कपिसंयोगाभावरूपसाध्याभावस्य द्रव्यादौ प्रतियोगिसमानाधिकरणतया तद्भिन्नत्वविरहेण लक्षणाघटकत्वादिति भावः । अत्र च सामानाधिकरण्यस्याव्याप्यवृत्तितायाः प्राक् स्वयं दूषितत्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशपक्षेप्यतिव्याप्तिवारणमशक्यामित्येतादृशानुपपत्तिमेव यद्वेत्यादिकल्पान्तरानुसरणबीजतया व्याचष्टे अत्र चेति ।

(दी०) अत्र च सामानाधिकरण्यवतो न तदभाववत्त्वं

प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वक्ष्यति तच्च हेत्वधिकरणे बोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणद्रव्यभावेति पुनरभावान्तार्थनिष्कर्षः ।

(गा०) असामानाधिकरण्यनिवेशकल्पे चेत्यर्थः । इत्यस्वरसादित्यनेनान्वयः । प्रतीतेः संयोगाभावे गुणे न संयोगसामानाधिकरण्यमित्यादिप्रतीतेः । अन्यथा गुणादिनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावविषयकतया । कपिसंयोगी एतत्त्वादित्यादावपि कपिसंयोगाभावादिरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकगुणादिवृत्तित्वावच्छिन्नतया लक्षणघटकतैवेत्यव्याप्तिरत आह तच्चेति । प्रतियोगिवैयधिकरण्यं चेत्यर्थः । हेत्वधिकरणे हेत्वधिकरणनिरूपितं एतत्कल्पे च पृथक् हेतुसामानाधिकरण्यं न निवेश्यमेवेति भावः । एवं च हेत्वाधिकरणनिरूपितप्रतियोग्यनाधिकरणवृत्तित्वमेवाभावे विशेषणं देयं न तु तदवच्छेदकावच्छिन्नत्वमनतिप्रयोजनकत्वात् वृत्तौ प्रतियोग्यनधिकरणानिरूपितत्वहेत्वधिकरणनिरूपितत्वयोर्निवेशापेक्षया तत्र हेत्वाधिकरणनिरूपितत्वस्य निवेशे च लाघवमित्यालोच्य तथैव निष्कर्षयति प्रतियोग्यनधिकरणीभूतेति । प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः तेन न दर्शितातिव्याप्तिः ।

(दी०) ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्तत्सामान्यस्य वा प्रतियोगितावच्छेदकयत्किञ्चिदवच्छिन्नस्य वा अनधिकरणत्वमुक्तम् आद्ये ऽव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वात् द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान वा सत्त्वादित्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वात् नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्ट-

स्याऽपि द्रव्यत्वस्य द्रव्यत्वाऽनतिरेकात् तृतीये कपिसंयोगाभाववानात्मत्वादित्यत्राऽव्याप्तिः साध्याभावानां कपिसयोगानां गुणानामधिकरणस्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नाऽनधिकरणत्वात् । मैवम् । यादृशप्रतियोगितावच्छेदकावच्छिन्नाऽनधिकरणत्वं हेतुमतस्तादृशप्रतियोगिताऽनवच्छेदकत्वस्य विवक्षितत्वात् ।

(गा०) यस्य कस्यचिदित्यादिषष्ठ्यन्तानामनधिकरणत्वमित्यनेनान्वयः प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वम् स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिकभेदमात्रम् तत्सामान्यस्यानधिकरणत्वम् स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदः । प्रतियोगितावच्छेदकयत्किञ्चिदिति । प्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वेन निवेश्य तदवच्छिन्नाधिकरणत्वावच्छिन्नभेदो वा विवक्षित इत्यर्थः । नव्यमते संयोगसामान्याभावस्य केवलान्वयितया तत्र साध्ये सत्तादिः सद्धेतुरेवेत्यतो द्रव्यत्वाभाववान् वेति । तत्प्रतियोगीति संयोगरूपसाध्याभावप्रतियोगीत्यर्थः तत्तत्संयोगत्वावच्छिन्नाभावाभावस्य तत्तत्संयोगादेः संयोगसामान्यानतिरिक्तत्वादिति भावः । द्रव्यत्वरूपाभावस्य एकव्यक्तिकतया व्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्यं न घटत इत्यतस्तस्य किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमाह नित्यत्वादीति । आदिना जन्यत्वादिपरिग्रहः । ननु विशिष्टाभावो विशिष्टस्यैव द्रव्यत्वस्य प्रतियोगी न तु शुद्धस्य तस्येति कथं शुद्धद्रव्यत्वस्य प्रतियोगिवैयधिकरण्यानुपपत्तिरित्यत आह स्वाभावेति । न च सर्वस्यैवाऽभावस्य पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशपक्षेऽसम्भवस्य साध्यतावच्छेदकसम्बन्धेन तद्वैयधिकरण्यनिवेशपक्षे स्वरूपसम्बन्धावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकसम्बन्धेन सर्वेषामेवाऽभावानां प्रतियोगिसमानाधिकरणत्वादव्या-

प्तिप्रसक्त्या यत्सम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नान-धिकरणत्वं हेतुमतस्तत्सम्बन्धावच्छिन्नतद्भावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभाव एव विवक्षणीयः एवं चोक्तस्थले स्वरूप-सम्बन्धेन प्रतियोग्यनधिकरणत्वाप्रसिद्धावपि संयोगादिसम्बन्धेन घटाद्यभावीयप्रतियोग्यनधिकरणीभूतहेतुमन्निष्ठघटाभावीयप्रतियोगितासु स्वरूपसम्बन्धावच्छिन्नत्वद्रव्यत्वाभावत्वाद्यवच्छिन्नत्वोभयाभावस्याक्षतत्वादतिव्याप्तिरित्यभिप्रायात् । आत्मनि संयोग-सामान्याभावस्य सर्वमतसिद्धत्वविरहात्कपीति । जन्यद्रव्यवृत्ति-हेतुके हेत्वधिकरणजन्यद्रव्ये गुणसामान्याभावस्यापि उत्पत्ति-कालावच्छेदेन स्वमते सत्त्वात्तत्र तादृशप्रतियोगिवैयधिकरण्यं न घटते अत आत्मत्वहेत्वनुसरणम् । गुणसामान्याभावत्वस्य कपि-संयोगस्वरूपाभावप्रतियोगितावच्छेदकत्वं स्फुटीकर्तुं कपिसंयोगानां गुणत्वकीर्तनम् । तत्प्रतियोगितावदवच्छेकेति । तथा च तादृशाभावा अपि यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधि-करणा एव तत्प्रतियोगितावच्छेदकत्वात् कपिसंयोगाभावत्वस्येत्य-व्याप्तिरिति भावः। यादृशेति । यद्यत्प्रतियोगितावच्छेदकावच्छिन्नाधि-करणत्वावच्छिन्नभेदवत्त्वमित्यर्थः । कपिसंयोग्येतत्वादित्यादौ क-पिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामान्यभेदव-त्त्वासम्भवात् स्वपदेन तादृशी प्रतियोगितोपादातुं न शक्यत इति ना-व्याप्तिः । द्रव्यत्वाभाववान् सत्त्वादित्यादौ हेतुमतो द्रव्यादेः विशिष्ट-द्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणत्वेपि द्रव्यत्वाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नानधिकरणत्वात् तस्य लक्षण-घटकतेति नातिव्याप्तिः। कपिसंयोगाभाववानात्मत्वादित्यादौ च कपि-संयोगाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नाधि-करणमेव हेतुमत् किन्तु गुणसामान्याभावत्वावच्छिन्नप्रतियोगिताव-च्छेदकावच्छिन्नानधिकरणमेव तदनवच्छेदकमेव साध्यतावच्छेदक-मिति नाव्याप्तिरिति भावः । न चैवं घटत्वाद्यवच्छिन्नप्रतियोगिताव-च्छेदकावच्छिन्नानधिकरणं धूमवत्तादृशप्रतियोगितानवच्छेदकं च वह्नित्वमित्याकारकस्याभावकूटावगाहिनः समूहालम्बनज्ञानस्यैवा-नुमितिहेतुतया विशिष्टपरामर्शस्यानुमितिहेतुत्वमनुपपन्नमभावकू-

टघटिततया व्याप्तेर्दुर्ज्ञेयत्वापत्तिश्चेति वाच्यम् । हेतुमन्निष्ठभेदप्रतियोगितायां स्वावच्छेदकावच्छिन्नवत्त्वसम्बन्धेनाऽवच्छेदिका या प्रतियोगिता तदनवच्छेदकत्वस्य एकसामान्याभावरूपस्य निवेशे तात्पर्यात् । तादृशभेदप्रतियोगितायां स्वावच्छिन्नवत्त्वसम्बन्धेनाऽनवच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतयैव सामञ्जस्येऽपि यथासन्निवेशे न वैयर्थ्यम् । तथाविधसम्बन्धेन तादृशभेदप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थो बोध्यः ।

सम्बन्धसामान्येन हेतुमत्त्वनिवेशे ऽव्याप्तेर्वक्ष्यमाणत्वात् सम्बन्धविशेषेण हेतुमत्त्वम् प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे चाऽसम्भवस्य वाच्यतया तत्र तच्च निवेशयति । अत्र चेति ।

(दी०) अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टः तेनैव सम्बन्धेन यो हेतुमांस्तत्र वर्तमानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यम् तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः ॥

यद्वा साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम् । तथा च सम्बन्धभेदेन प्रतियोगिता न विशेषणीया । एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं न त्वधिकरणत्वम् । तथाच धर्मिणो ऽपि व्याप्यत्वं व्यापकत्वं च निर्वहति । तथाहि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना या प्रतियोगिता तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वम् । एवं धर्मिणो धर्मव्याप्यत्वव्यापकत्वे बोध्ये ।

(गा०) ग्राह्यसामानाधिकरण्ये । अनुमितिकारणीभूतज्ञानविषयहेतु-निष्ठसाध्यसामानाधिकरण्यशरीरे । साध्यस्य चेति । अत्रापि ग्राह्यसा-मानाधिकरण्य इति प्रविष्ट इति चाऽनुषज्यते । तथा च तत्सम्बन्धेन हेतुमति वर्तते योऽभावस्तदीयतत्सम्बन्धावच्छिन्नप्रतियोगिता-नवच्छेदको यो धर्मस्तदवच्छिन्नस्य तेन साध्यतावच्छेदकसम्ब-न्धेनाऽधिकरणे तेन हेतुतावच्छेदकसम्बन्धेन वर्तमानत्वं तादृश-साध्यतावच्छेदकसम्बन्धेन साध्यानुमितिप्रयोजकमित्यर्थः । व्यापकताघटकसाध्यीयसम्बन्धेन साध्याधिकरणे तादृशसाधनी-यसम्बन्धेन साधनस्याऽवर्तमानत्वग्रहदशायामनुमितिवारणाय सा-मानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनम् । वस्तुतस्तु वि-रुद्धत्वेन ज्ञायमानधर्मवत्ताज्ञानस्याऽनुमितावेव प्रतिबन्धतया वक्ष्यमाणतया सामानाधिकरण्यशरीरे सम्बन्धविशेषानिवेशेऽपि न क्षतिः । सामानाधिकरण्यावगाहितायाः प्रयोजकत्वं च विशिष्टपरामर्शनिर्वाहायोपेयते । पर्वतीयधूमव्यापको वह्निरिति व्या-पकतापरामर्शस्य हेतुताया दूषितव्यत्वात् । न च स्वव्यापकसाध्य-कहेतुमानित्याकारकः सामानाधिकरण्यानवगाहिविशिष्टपरामर्श एव हेतुरास्तामिति वाच्यम् । बहुव्रीह्यर्थस्य सामानाधिकरण्यपर्य-वसितत्वादिति ध्येयम् । प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगि-तावच्छेदकसम्बन्धस्थाने साध्यतावच्छेदकसम्बन्धनिवेशन एव साध्यतावच्छेदकसम्बन्धेन साध्यवद्वृत्त्यधिकरणनिष्ठसम्बन्धान्तरा-वच्छिन्नसाध्याभावमादाय दूषणस्याऽपि निराकरणसम्भवे प्रतियो-गितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशनमफलमित्याश-येनाह । यद्वेत्यादि । तादात्म्यसम्बन्धेन व्यापकतानिर्वाहाय प्रतियो-ग्यनधिकरणत्वमनुक्त्वा प्रतियोग्यसम्बन्धित्वमभिहितम् । ननु प्रति-योगिवैयधिकरण्ये सम्बन्धित्वनिवेशेपि तादात्म्यसम्बन्धेन व्याप्तिर्न निर्वहति, तादृशसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणाप्रसि-द्ध्या तद्घटितसामानाधिकरण्यस्याऽप्रसिद्धेरित्यत आह । एवं स्थि-त इति । प्रतियोगिवैयधिकरण्यशरीरे सम्बन्धित्वानिवेशे सती-त्यर्थः । सम्बन्धित्वं निवेशनीयमिति । तथा च साध्यसामानाधिक-रण्यं साध्यसम्बन्धिसम्बन्धित्वम् । अभावस्य हेतुसामानाधिकरण्य-मपि हेतुसम्बन्धिसम्बन्धित्वमादिना ग्राह्यम् । धर्मिणः । धूम-

वदादेर्वह्निमदादेश्च । तदेव दर्शयति । तथाहीति । तादात्म्यसम्ब-न्धावच्छिन्नेति पूर्वकल्पाभिप्रायेण । धूमवद्वह्निमतोर्व्याप्ति-मुक्त्वा धर्मिणो धूमवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वं वाह्निमदादि-रूपधर्मिणश्च धूमादिधर्मव्यापकत्वं चाह—एवमिति ।

(दी०) अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते । यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षवि-शिष्टत्वज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्व-मवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः । तेन न धू-मावयवे संयोगेन नवा समवायेन पर्वते वह्निधीः । तथै-वाऽवगतव्यापकताघटकसम्बन्धेन व्यापकस्याऽभावग्रहे गृही-तव्याप्यताघटकसम्बन्धेनैव व्याप्यस्याऽभावः सिद्ध्यतीति । कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन, संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तते, निवर्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते । तथाच तादात्म्यसम्बन्धेनैव जलादीनां व्याप्यत्व-ग्रहाद्व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिद्ध्यति, स एव चाऽन्योन्याभावः । इत्थमेव च तादात्म्याद्वृक्षशिंशपयोर्व्याप्ति-निश्चय इति संगच्छते ॥

(गा०) अत एव तादात्म्यसम्बन्धेन व्याप्तिव्यवस्थापनादेव । तत्र तत्रोक्तमिति । पृथिवीत्वेनेतरभेदसाधनायेत्यादिः । सङ्गच्छते इति । अन्यथा जलादीनां संयोगादिना पृथिव्यादिवृत्तितया तेन सम्बन्धेन व्याप्तेर्जलादिभेदसाधनानुपयोगितया च तदुक्त्यसंगतेरिति भावः । पृथिवीत्वाभावस्य स्वरूपसम्बन्धावच्छिन्नाभावेन पृथिवीत्वस्वरूपेण जलादिभेदः सिद्ध्यति न तु तस्य कालिकसम्बन्धावच्छिन्नाभावेने-त्यत्र, पृथिवीत्वेन व्याप्यस्य जलादेरन्योन्याभाव एव सिद्ध्यति न त्वत्यन्ताभाव इत्यत्र वा किं नियामकमित्याशङ्कायां व्यतिरेकि-

(गा०) ग्राह्यसामानाधिकरण्ये । अनुमितिकारणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरे । साध्यस्य चेति । अत्रापि ग्राह्यसामानाधिकरण्य इति प्रविष्ट इति चाऽनुषज्यते । तथा च तत्सम्बन्धेन हेतुमति वर्तते योऽभावस्तदीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्नस्य तेन साध्यतावच्छेदकसम्बन्धेनाऽधिकरणे तेन हेतुतावच्छेदकसम्बन्धेन वर्तमानत्वं तादृशसाध्यतावच्छेदकसम्बन्धेन साध्यानुमितिप्रयोजकमित्यर्थः । व्यापकताघटकसाध्यीयसम्बन्धेन साध्याधिकरणे तादृशसाधनीयसम्बन्धेन साधनस्याऽवर्तमानत्वग्रहदशायामनुमितिवारणाय सामानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनम् । वस्तुतस्तु विरुद्धत्वेन ज्ञायमानधर्मवत्ताज्ञानस्याऽनुमितावेव प्रतिबन्धताया वक्ष्यमाणतया सामानाधिकरण्यशरीरे सम्बन्धविशेषानिवेशेऽपि न क्षतिः । सामानाधिकरण्यावगाहितायाः प्रयोजकत्वं च विशिष्टपरामर्शनिर्वाहायोपेयते । पर्वतीयधूमव्यापको वह्निरिति व्यापकतापरामर्शस्य हेतुताया दूषितव्यत्वात् । न च स्वव्यापकसाध्यकहेतुमानित्याकारकः सामानाधिकरण्यानवगाहिविशिष्टपरामर्श एव हेतुरास्तामिति वाच्यम् । बहुव्रीह्यर्थस्य सामानाधिकरण्यपर्यवसितत्वादिति ध्येयम् । प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकसम्बन्धस्थाने साध्यतावच्छेदकसम्बन्धनिवेशन एव साध्यतावच्छेदकसम्बन्धेन साध्यवद्वृत्त्यधिकरणनिष्ठसम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दूषणस्याऽपि निराकरणसम्भवे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशनमफलमित्याशयेनाह । यद्वेत्यादि । तादात्म्यसम्बन्धेन व्यापकतानिर्वाहाय प्रतियोग्यनधिकरणत्वमनुक्त्वा प्रतियोग्यसम्बन्धित्वमभिहितम् । ननु प्रतियोगिवैयधिकरण्ये सम्बन्धित्वनिवेशेपि तादात्म्यसम्बन्धेन व्याप्तिर्न निर्वहति, तादृशसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणाप्रसिद्ध्या तद्घटितसामानाधिकरण्यस्याऽप्रसिद्धेरित्यत आह । एवं स्थित इति । प्रतियोगिवैयधिकरण्यशरीरे सम्बन्धित्वानिवेशे सतीत्यर्थः । सम्बन्धित्वं निवेशनीयमिति । तथा च साध्यसामानाधिकरण्यं साध्यसम्बन्धिसम्बन्धित्वम् । अभावस्य हेतुसामानाधिकरण्यमपि हेतुसम्बन्धिसम्बन्धित्वमादिना ग्राह्यम् । धर्मिणः । धूम-

वदादेर्वह्निमदादेश्च । तदेव दर्शयति । तथाहीति । तादात्म्यसम्बन्धावच्छिन्नेति पूर्वकल्पाभिप्रायेण । धूमवद्वह्निमतोर्व्याप्तिमुक्त्वा धर्मिणो धूमवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वं वह्निमदादिरूपधर्मिणश्च धूमादिधर्मव्यापकत्वं चाह—एवमिति ।

(दी०) अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते । यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्वज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः । तेन न धूमावयवे संयोगेन नवा समवायेन पर्वते वह्निधीः । तथैवाऽवगतव्यापकताघटकसम्बन्धेन व्यापकस्याऽभावग्रहे गृहीतव्याप्यताघटकसम्बन्धेनैव व्याप्यस्याऽभावः सिद्ध्यतीति । कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन, संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तते, निवर्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते । तथाच तादात्म्यसम्बन्धेनैव जलादीनां व्याप्यत्वग्रहाद्व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिद्ध्यति, स एव चाऽन्योन्याभावः । इत्थमेव च तादात्म्याद्वृक्षशिंशपयोर्व्याप्तिनिश्चय इति संगच्छते ॥

(गा०) अत एव तादात्म्यसम्बन्धेन व्याप्तिव्यवस्थापनादेव । तत्र तत्रोक्तमिति । पृथिवीत्वेनेतरभेदसाधनायेत्यादिः । सङ्गच्छते इति । अन्यथा जलादीनां संयोगादिना पृथिव्यादिवृत्तितया तेन सम्बन्धेन व्याप्तेर्जलादिभेदसाधनानुपयोगितया च तदुक्त्यसंगतेरिति भावः । पृथिवीत्वाभावस्य स्वरूपसम्बन्धावच्छिन्नाभावेन पृथिवीत्वस्वरूपेण जलादिभेदः सिद्ध्यति न तु तस्य कालिकसम्बन्धावच्छिन्नाभावेनेत्यत्र, पृथिवीत्वेन व्याप्यस्य जलादेरन्योन्याभाव एव सिद्ध्यति न त्वत्यन्ताभाव इत्यत्र वा किं नियामकमित्याशङ्कायां व्यतिरेकि-

णि तत्सम्बन्धघटितव्यापकत्वेन गृह्यमाणस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकादेवाऽभावाद्धेतौ येन सम्बन्धेन यस्य व्याप्यता गृहीता तत्सम्बन्धावच्छिन्नप्रतियोगिताक एव तदभावः सिद्ध्यतीति समाधास्यन् अन्वयिनि व्याप्यताघटकसम्बन्धेन व्याप्यवत्ताज्ञानात् व्यापकताघटकसम्बन्धेनैव व्यापकं सिद्ध्यतीति नियमं दृष्टान्तविधया दर्शयति । यथा चेति । तादृशेनैव विशिष्टज्ञाने । पक्षधर्मिकविशिष्टज्ञाने । विशिष्टानुमितिः । वैशिष्ट्यविषयकानुमितिः । व्याप्यताघटकसम्बन्धेनैव व्याप्यवत्ताज्ञानं हेतुरिति नियमस्य व्यापकताघटकेनैव सम्बन्धेन व्यापकस्यानुमितिनियमस्य च क्रमेण प्रयोजनमाह । तेनेति । अनवतीर्णबाधस्याऽभ्रान्तस्येति शेषः । धूमावयवे न वह्निधीरित्यन्वयः । तस्य समवायसम्बन्धेन वह्निव्याप्यधूमवत्त्वेऽपि व्याप्यताघटकेन संयोगेन तद्वत्त्वाभावादिति भावः । नवा समवायेनेति पर्वतवृत्तिहेतुं प्रति समवायेन वह्निरव्यापकत्वादिति भावः । प्रकृतोपयुक्तनियमद्वयमाह । तथैवेति । सम्बन्धेन । सम्बन्धेनैव । एतन्नियमद्वयस्य प्रयोजनान्तरानुरोधेनाप्यावश्यकत्वमिति दर्शयति । कथमन्यथेति । अन्यथा—एतादृशनियमानभ्युपगमे । इति नियमः कथमुपपद्यत इत्यन्वयः। महानसे संयोगेन धूमो न निवर्तत इत्यन्वयः। महानसधर्मिकसिद्धिविषयसंयोगसम्बन्धावच्छिन्ननिवृत्तिप्रतियोगी नेत्यर्थः । निवर्तते च । धूम इत्यनुषज्यते । प्रकृतमाह । तथा चेति । व्याप्यत्वग्रहात् । स्वरूपसम्बन्धावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्यताग्रहात् । व्यापकनिवृत्त्या । स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकेनैव पृथिवीत्वाभावाभावेन । तेषाम् । जलादीनाम् । न चैतावताऽपि अत्यन्ताभावसिद्धिः कथं निराकृतेत्यत आह । स एव चेति । स चान्योन्याभाव एवेति योजना । तादात्म्यसम्बन्धावच्छिन्नाभावश्चाऽन्योन्याभाव एव न त्वत्यन्ताभाव इत्यर्थः । अतो नेतरात्यन्ताभावसिद्धिरिति भावः । तादात्म्यसम्बन्धेन व्याप्तौ प्राचां सम्मतिमाह । इत्थमेव चेति । तादात्म्यसम्बन्धेन व्याप्तिस्वीकारेणैव । इति ग्रन्थः सङ्गच्छते इत्यन्वयः । ननु तादात्म्यसम्बन्धेन व्याप्त्यनभ्युपगमे का क्षतिः जलादिभेदसिद्धेर्जलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वेन पृथिवीत्वज्ञानादेव सम्भवात् पृथिव्येकदेशे जलादिभेदप्रसिद्धा तादृशव्याप्तिग्रहसम्भवस्य व्यतिरेकिणि वक्ष्यमाणत्वात् । ता-

दात्म्यसम्बन्धेन धर्मिणोऽनुमितेरप्यनुभवासिद्धत्वे धर्मितादात्म्यनिष्ठव्यापकताज्ञानस्यैव तद्धेतुतायाः स्वीकरणीयत्वात्, असति प्रतिबन्धके तत्तादात्म्यादिविधेयकानुमितौ तादात्म्यसम्बन्धेन तस्य विधेयत्वोपगमे क्षतिविरहादित्यत आह—

(दी०) अत एव गोत्वत्वाद्यग्रहदशायां यत्र सास्नादिः सा गौरिति तादात्म्येन गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गौः, गोर्व्यतिरेकाच्च सास्नादिव्यतिरेकः सिद्ध्यति । एवं च संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वम् । वृत्त्यनियामकसंयोगमात्रस्याऽभावप्रतियोगितावच्छेदकत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि । तदभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वात् । सिद्धिरपि तस्य तथैव न तु वृत्तिनियामकसम्बन्धेन । तेनाऽसम्बन्धित्वादव्यापकत्वाच्च । व्यक्तीभविष्यति चैतदुपरिष्टात् ॥

(गा०) अत एवेति । तादात्म्यसम्बन्धेन व्याप्तिस्वीकारादेव । गोत्वत्वाग्रहदशायां गौः सिद्ध्यतीत्यन्वयः । अन्यथा तत्र गोत्वत्वरूपसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमित्यौपयिकव्याप्तेर्दुर्ग्रहतया गोत्वसाध्यकानुमितेर्गोतादात्म्यस्यापि गोत्वरूपतया तन्निष्ठव्यापकताया अपि गोत्वत्वोपस्थितिमन्तरेण दुर्ग्रहतया तादात्म्यधर्मिकव्यापकताज्ञानाधीनतादात्म्यसंसर्गकगवानुमितेश्चाऽसम्भवेनाऽयं गौरित्याकारकानुमितेरनुभवसिद्धाया अपलापप्रसङ्गादिति भावः । यद्यपि गोत्वांशे गोत्वत्वं धर्मितावच्छेदकीकृत्य व्यापकतावच्छेदकत्वावगाहिग्रह एव गोत्वेन गोसाध्यकानुमितावपि हेतुर्वाच्यः निर्धर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतयाऽनुमित्यजनकत्वादिति तादात्म्येन गोत्वावच्छिन्नसाध्यकानुमितिरपि गोत्वत्वानुपस्थितिदशायां न सम्भवति । तथापि वक्ष्यमाणप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायेणेदमभिहितं तन्मते स्वरूप-

तः साध्यतावच्छेदकप्रकारिकायामनुमितौ स्वरूपतः साध्यतावच्छेदकप्रकारकस्य साधनवन्निष्ठाभावप्रतियोगित्वत्वावच्छेदेन साध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावावगाहिज्ञानस्य हेतुतया तत्र गोत्वत्वज्ञानानपेक्षणेनाऽनुपपत्त्यभावात्। ईदृशयुक्त्या तादात्म्येन व्यापकतासिद्धिवत् गोत्वत्वाग्रहदशायां या गौस्तत्र सास्नादिरिति व्याप्तिग्रहाधीनगवादिहेतुकसास्नादिसिद्ध्यनुरोधात् तत्सम्बन्धेन व्याप्यतासिद्धिरपि द्रष्टव्या। केचित्तु तादात्म्यसम्बन्धेन व्यापकत्वानुपगमेऽपि गवान्यावृत्तित्वरूपव्याप्तिज्ञानात् गोत्वादिविधेयकानुमितिर्निष्प्रत्यूहैव। तथा सति अयं गौरित्याकारकताऽप्यनुमितेर्निर्वहति स्वरूपतो गोत्वावगाहिनो गवान्यावृत्तित्वज्ञानात्स्वरूपत एव गोत्वविषयिण्यास्तस्या स्सम्भवात्। न चानवच्छिन्नविधेयताया अक्लृप्तत्वात्तादात्म्येन गोरेव विधेयत्वमुचितम्। अयं गौरित्याकारक इदन्त्वावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षे या गोत्वादिप्रकारता तस्या एव विधेयतात्वोपगमेऽनुमितौ तत्कल्पनेऽतिरिक्तविधेयताकल्पनाभावात्। अस्तु वा गवान्यावृत्तित्वरूपव्याप्तिज्ञानादेव तादात्म्येन गवानुमितिः किं तादात्म्येन व्यापकतयेत्याशङ्कानिराचिकीर्षयोक्तं गोत्वत्वाद्यग्रहदशायामिति। गवेतरावृत्तित्वस्य हेतुभूतसास्नादावग्रहदशायामित्यर्थ इत्याहुस्तन्न। गवेतरावृत्तित्वमात्रस्य गोत्वत्वशब्दार्थताविरहेणोदक्षरताया दुर्वारत्वात्। गोत्वत्वपदं तद्वृत्तिधर्मपरमिति तु न सम्यक्। गोत्वत्वस्य विशिष्टगोवृत्तित्वस्वरूपस्य स्वरूपतो भानासम्भवेन तज्ज्ञानदशायां तद्वृत्तिधर्मभानस्याऽवश्यकत्वात्। अपरे तु गोत्वत्वाद्यग्रहदशायामपि गौः सिद्ध्यतीत्यन्वयः। यदा गोत्वत्वमनुमितौ न भासते तदापि तत्र गौर्भासत इत्यर्थः स्वरूपतो गोत्वस्यैव सास्नादिलिङ्गकानुमितौ भानस्योपगन्तव्यतया विधेयतायाश्चाऽवच्छिन्नत्वनियमेन स्वरूपतो गोत्वप्रकारकानुमितेरनुभवसिद्धाया अनुपपत्तिरित्युपष्टम्भसंगतिरिति प्राहुः। यत्तु अनवच्छेदकांशे तादात्म्यसम्बन्धेन स्वरूपतः साध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांश आधेयतासम्बन्धेन स्वरूपतस्तत्प्रकारकज्ञानाद्वा स्वरूपतस्तत्प्रकारकानुमितिरित्युपगमेन गोत्वत्वाग्रहदशायामपि तादात्म्येन व्यापकताज्ञानादनुमितिर्निर्वहतीति नोक्तानु-

पपत्तिरिति तदसत् । अयंगौरित्यादिज्ञानानुव्यवसाये स्वरूपतो गोत्वादिविशेषितप्रकारिताप्रकारेण ज्ञानभानात् समवायातिरिक्तेन निरूपितत्वसम्बन्धेन गोत्वादेः स्वरूपतः प्रकारताया आवश्यकत्वेऽपि समवायातिरिक्तेनापरसम्बन्धेन स्वरूपतः प्रकारताया अप्रामाणिकत्वात् अन्यथा व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वादेर्विधेयतावच्छेदकत्वानुपपत्त्या केवलान्वयिग्रन्थे तज्ज्ञानस्याऽनुमितिहेतुताखण्डनं दीधितिकृतां विरुद्ध्येत उक्तक्रमेणैव तन्निर्वाहात् । न च तथा सति प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायकतयाऽपि नैतद्ग्रन्थसंगतिरिति वाच्यम् । प्रकारित्वांश इवाऽवच्छेदकत्वांऽशेपि निरूपितत्वसम्बन्धेन जातेः स्वरूपतः प्रकारित्वाभिप्रायेणैतद्ग्रन्थसंगमनात् । तस्याऽप्रामाणिकत्वाभिप्रायेणाऽग्रिमव्यापकताज्ञानहेतुताखण्डनसंगतेः । अपरे तु गोत्वत्वाद्यग्रहदशायामपि स्वरूपतो भासमानगोत्वावच्छिन्ने हेतुमन्निष्ठभेदप्रतियोगितानिरूपिततादात्म्यसम्बन्धावच्छिन्नावच्छेदकत्वाभावरूपान्योन्याभावघटिततादात्म्यसम्बन्धावच्छिन्नव्यापकताज्ञानात्तादात्म्येन स्वरूपतो गोत्वप्रकारिकाऽनुमितिः सम्भवत्येव । एकरूपेणा ऽवच्छेदकेऽपि अवच्छेदकतानवच्छेदकरूपेणा ऽवच्छेदकत्वाभावं स्वीकृत्यैवान्योन्याभावघटितलक्षणस्य ग्रन्थकृता यद्रूपावच्छिन्नमित्यादिना परिष्करणीयत्वात् तदभिप्रायेणैवैतत्संगतेः । केवलान्वयिग्रन्थे च प्रतियोगिनि प्रतियोगितानवच्छेदकरूपेण तत्त्वाभावस्यैवावच्छेदकतानवच्छेदकरूपेणाऽवच्छेदकत्वाभावस्याऽप्रामाणिकतया व्यापकताज्ञाने साध्यतावच्छेदकस्य स्वरूपतो भानं न सम्भवतीत्यभिप्रायेण व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वप्रकारकानुमितेरनुपपत्तेर्वक्ष्यमाणतया न पूर्वापरग्रन्थविरोध इति प्राहुः । तादात्म्येन गोर्व्यतिरेकाच्चेति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकात्तादात्म्यसम्बन्धघटितव्यापकतावच्छेदकगोत्वावच्छिन्नस्य भेदरूपाभावादित्यर्थः । समवायसम्बन्धावच्छिन्नाभावस्य साधकत्वेपि तत्प्रतियोगितावच्छेदकगोत्वत्वाद्यग्रहदशायां तदभावस्य ज्ञानासम्भवेन ततः सास्नाभावसिद्ध्यसम्भवादिति भावः । एवं च । अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे च । गगनादेरपीति । तस्याऽधिकरणाप्रसिद्धावपि संयोगेन तत्सम्बन्धिवृत्तित्वस्याऽभावे तत्र च

साध्यवत्सम्बन्धित्वस्य प्रसिद्ध्या यथोक्तव्याप्तिसत्त्वादिति भावः । वृत्त्यनियामकसंयोगव्यावृत्तरूपेण संयोगस्याऽभावप्रतियोगितावच्छेदकसम्बन्धत्वेन साध्यतावच्छेदकसम्बन्धस्य गगनीयसंयोगस्याऽभावप्रतियोगितानवच्छेदकतया प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशकल्पे तथाविधप्रतियोगित्वाप्रसिद्ध्या संयोगेन गगनस्य व्यापकता न निर्वहतीत्यत उक्तं वृत्त्यनियामकसंयोगमात्रस्येति । तादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थः । यद्वेत्याद्युक्तकल्पे वृत्त्यनियामकसंयोगसाधारणरूपेण तादृशसम्बन्धत्वविरहेपि न क्षतिः तन्मते प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशादित्याशयेनाह । साध्यतावच्छेदकसम्बन्धेनेति । पृथिवीत्वादिव्यापकत्वमपीत्यत्र संयोगेन गगनादेरित्यनुषज्यते । ननु प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे पृथिव्यादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया गगनादेर्न पृथिवीत्वादिव्यापकतासम्भव इत्यत आह—तदभाववतोऽपीति । समवायादिना गगनाद्यभाववतोऽपीत्यर्थः । तत्सम्बन्धित्वात् । गगनादिसम्बन्धित्वात् । तथा च तादृशगगनाद्यभावो न साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमन्निष्ठ इत्यभावान्तरमादाय लक्षणसत्त्वं निष्प्रत्यूहमेवेति भावः । ननु संयोगेन गगनस्य व्यापकत्वे बाधानवतारदशायामभ्रान्तस्य वृत्तिनियामकसंयोगेनैव कथं न गगनानुमितिरित्यत आह । सिद्धिरपीति । तथैव । वृत्त्यनियामकसंयोगेनैव तेनाऽसम्बन्धित्वादिति ! तथा च तत्सम्बन्धावगाहनेऽनुमितेर्भ्रमतया तत्र भ्रमात्मकपरामर्शस्याऽपेक्षितत्वादिति भावः । यद्रूपावच्छिन्नयत्सम्बन्धस्य व्यापकताघटकत्वं तद्रूपावच्छिन्नतत्सम्बन्धेनैवाऽनुमितिरिति नियमाभिप्रायेण दोषान्तरमाह । अव्यापकत्वाच्चेति । वृत्त्यनियामकेन सम्बन्धेनैव गगनाद्यभावस्य प्रतियोगिसमानाधिकरणतया वृत्तिनियामकसंयोगेन प्रतियोगिव्यधिकरणाभावप्रतियोगितायाः गगने सत्त्वेन तत्सम्बन्धस्य व्यापकत्वाघटकत्वादित्यर्थः । तथा च व्यापकत्वाघटकसम्बन्धस्याऽनुमितावभानात् न तेनाऽनुमितिप्रसङ्ग इति भावः । ननु वृत्तिनियामकसंयोगेन गगनादिसम्बन्धिनोऽप्रसिद्ध्या कथं

तेन सम्बन्धेन गगनाद्यभावस्य प्रतियोगिवैयधिकरण्यमित्यत आह । व्यक्तीभविष्यतीति । वक्ष्यमाणोभयाभावघटितप्रतियोगिवैयधिकरण्यं तत्रापि सुलभमिति भावः ।

कालिकविशेषणतया घटादिसाध्यके महाकालत्वादिहेतौ अप्रसिद्धिनिबन्धनाऽव्याप्तिं शङ्कते नन्वित्यादिना ।

(दी०) नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषणाऽव्याप्यवृत्ति किमपि व्यापकं न स्यात् । स्वावच्छेदकसम्बन्धेन प्रतियोगिनोऽसम्बन्धिनि काले वर्तमानस्याऽभावस्य प्रतियोगितायां तत्सम्बन्धाऽवच्छिन्नत्वस्य तेन सम्बन्धेन यत् प्रतियोगिसम्बन्धि तदन्यत्वस्य च काले ऽसम्भवात् ॥

(गा०) खण्डकालवृत्त्येतत्कालत्वादिहेतुकस्थले ऽतीतानागतव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नतादृशसम्बन्धावच्छिन्नाभाव एव हेतुमति प्रतियोगिव्यधिकरणः प्रसिद्ध इति नाऽव्याप्तिरतो ऽष्टद्रव्यातिरिक्तद्रव्यात्मकेति । जन्यमात्रस्य कालोपाधितामते द्रव्यात्मकस्याऽपि खण्डकालस्य सम्भवान्न महाकालपर्यन्तलाभ इत्यतो ऽतिरिक्तान्तम् । यद्यपि गगनदिगात्ममनसां नित्यतया खण्डकालत्वासम्भवेन चतुर्द्रव्यातिरिक्तेत्युक्तावपि महाकाललाभस्तथापि यत्किञ्चिच्चतुर्द्रव्यातिरिक्तत्वस्य पृथिव्यादावपि सत्त्वात्पृथिव्यादिचतुष्टयातिरिक्तत्वस्य च विशिष्याऽभिधान एव तल्लाभः । तान्त्रिकैर्महाकालस्यैवाऽष्टद्रव्यातिरिक्तद्रव्यपदेनाऽभिधानात्तथाऽभिधाने विशिष्याऽनभिधानेऽपि नाऽन्यपरत्वशङ्केति तथैवा ऽभिहितम् । खण्डकालसाधारणमहाकालवृत्तेर्हेतुत्वे खण्डकालरूपहेत्वधिकरणे एव लक्षणघटकोक्ताभावप्रसिद्धिरिति कालमात्रवृत्तीत्यत्र मात्रपदम् । समवायादिना कस्यचित्साध्यत्वे समवायादिना घटाद्यभाव एव महाकाले तेन सम्बन्धेन प्रतियोगिव्याधिकरणः प्रसिध्यतीत्यतो विशेषणताविशेषेणेति । कालिकविशेषणतयेत्यर्थः । व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यानुपादानेन केवलान्वयिवाच्यत्वादेर्व्यापकतासम्भव इत्यतोऽव्याप्यवृत्तीति । कालिकसम्बन्धे-

नाऽव्याप्यवृत्तित्वं च व्यतिरेकिमात्रस्यैव, केवलान्वयिनोऽप्यनित्यस्य विश्वविषयकजन्यज्ञानविषयत्वादेर्बोध्यम् । एतत्सर्वं वस्त्वभिप्रायेणाऽभिहितम् । महाकालान्यवृत्तिहेतुकेऽन्यसम्बन्धेन साध्यतायां च हेतुमति सर्वत्र साध्यतावच्छेदकसम्बन्धेन वृत्तिमन्मात्रस्यैव· तेन सम्बन्धेन वृत्तित्वभ्रमदशायां अनुमितिजनकज्ञानानुपपत्तिरपि द्रष्टव्या । एवं कालिकसम्बन्धेन व्याप्यवृत्तिसाध्यकेऽपि तेन सम्बन्धेन साध्यस्याऽव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितायाः प्रतियोगिवैयधिकरण्याघटितायाश्च व्यापकताया दुर्ग्रहत्वान्महाकालत्वादिहेतुकानुमित्यनुपपत्तिरपि । स्वावच्छेदकसम्बन्धेन स्वावच्छेदकविशिष्टानधिकरणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानिवेशकल्पे तादृशप्रतियोगित्वाप्रसिद्ध्यभिधानेनाऽव्याप्तिं स्फुटीकरोति । स्वावच्छेदकेति । स्वम् । प्रतियोगिता । काले । महाकाले । तत्सम्बन्धावच्छिन्नत्वस्य । कालिकसम्बन्धावच्छिन्नत्वस्य, असम्भवादिति योजना । कालिकसम्बन्धेन वृत्तिमन्मात्रस्यैव महाकाले वृत्तेः, अवृत्तेश्च तेन सम्बन्धेन सम्बन्धिनोऽप्रसिद्ध्या कस्यापि कालिकसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमद्वृत्तित्वासम्भवेन समवायादिसम्बन्धावच्छिन्नघटाद्यभावस्यैव तथात्वात्तत्प्रतियोगितायाश्च समवायादिसम्बन्धेनैवाऽवच्छिन्नत्वादिति भावः । साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमद्वृत्त्यभावीयसम्बन्धावच्छिन्नत्वाविशेषितप्रतियोगितानिवेशकल्पे तादृशसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमत एवाऽप्रसिद्ध्याऽव्याप्तिरित्याह । तेनेति । तेन सम्बन्धेन । कालिकसम्बन्धेन । गगनाद्यभावप्रतियोगिनस्तेन सम्बन्धेन सम्बन्धिरूपप्रतियोग्यप्रसिद्ध्या तेन सम्बन्धेन प्रतियोग्य सम्बन्धित्वासिद्धिं स्फुटीकर्तुं प्रतियोग्यसम्बन्धित्वस्येत्यनभिधाय यत्प्रतियोगिसम्बन्धि तदन्यत्वस्येत्यसमासेनाऽभिधानम् ।

अथ कालिकसम्बन्धेन महाकालान्यवृत्तित्वविशिष्टस्य घटस्य तत्सम्बन्धावछिन्नाभाव एव महाकाले प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणः प्रसिद्धस्तमादायैव च लक्षणसमन्वयात् कथमव्याप्त्यभिधानं न हि महाकालान्यवृत्तित्वविशिष्टघटादिनिरूपितः कालिकसम्बन्धोऽपि महाकाले सम्भवति

तद्धर्मिवृत्तित्वविशिष्टनिरूपितसम्बन्धानुयोगितायास्तद्धर्मिनियतत्वात् अन्यथा सत्त्वादिमति गुणादौ द्रव्यादिवृत्तित्वविशिष्टसत्ताद्यभावप्रत्ययानुपपत्तेः। न चैवं ह्रदादिवृत्तित्वविशिष्टवन्ह्यभावादेर्विषयितया सम्बन्धित्वं ज्ञाने न स्यात् ज्ञानस्य ह्रदादिवृत्तित्वानिरूपकत्वादिति ह्रदो वन्हिमानित्यादौ तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वं न स्यात्। ज्ञाननिष्ठं विषयितया यादृशविशिष्टवत्त्वमनुमितिप्रतिबन्धकतावच्छेदकं तादृशविशिष्टस्यैव तथात्वात्। यदि च तत्सम्बन्धेन तद्धर्मिसम्बन्धित्वविशिष्टनिरूपितस्तादृशसम्बन्धो विशेषणकोटिप्रविष्टधर्मिनियत इति सम्बन्धान्तरेण ह्रदादिवृत्तित्वविशिष्टनिरूपितविषयितासम्बन्धो ज्ञाने सम्भवत्येवेत्युच्यते। तदाऽपि इच्छादिविषयत्वविशिष्टघटादिनिरूपितविषयितासम्बन्धस्य ज्ञानेऽसम्भवादिच्छाविषयत्वाभावसाध्यकघटादिपक्षकस्थले तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वानुपपत्तिर्दुर्वारैवेति वाच्यम्। विशिष्टनिरूपितविषयितातिरिक्तसम्बन्धस्यैव विशेषणीभूतसम्बन्धितानिरूपकाधिकरणत्वनियतत्वोपगमात्तद्धर्मविशिष्टतन्निरूपितविषयितायां तदंशे तद्धर्मप्रकारकत्वमात्रस्याऽपेक्षितत्वात्। इच्छाविषयो घट इत्यादिज्ञाने इच्छाविषयत्वविशिष्टघटादिनिरूपितविषयितासत्त्वेन बाधकाभावात्। न चैतदनुरोधेनैव विशिष्टवृत्तिताघटकसम्बन्धेन विशेषणविशेष्योभयाधिकरणेऽपि विशिष्टाधिकरणत्वं स्वीक्रियते प्रकृते चेच्छाविषयत्वतादृशघटयोर्द्वयोरपि विषयितासम्बन्धेन ज्ञाने सत्त्वात्तादृशविशिष्टाधिकरणत्वं ज्ञाने ऽक्षतमेवेति नेच्छाविषयत्वविशिष्टघटादेर्हेत्वाभासत्वानुपपत्तिः। इत्थं च कालिकसम्बन्धेन महाकालान्यत्वस्य महाकाले सत्त्वाद्विशिष्टाधिकरणत्वं महाकाले वर्तत एवेति कथं विशिष्टाभावः प्रतियोगिव्यधिकरण इति वाच्यम्। विशेष्यसम्बन्धेनोभयाधिकरणेऽपि विशिष्टाधिकरणत्वाङ्गीकारे घटपटोभयसंयुक्तभूतले घटसमवायिकपालसंयुक्तत्वविशिष्टपटनिरूपिताधिकरणत्वप्रसङ्गात्। इच्छाविषयत्वं घटश्चेति समूहालम्बनेऽपि तादृशविशिष्टाधिकरणत्वसत्त्वापत्त्या प्रतिबन्धकतातिरिक्तवृत्तितया तस्य हेत्वाभासत्वानुपपत्तितादवस्थ्यादिति। न च महाकाले महाकालान्यवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपगमे तस्य विश्वाधारत्वव्याघात इति शङ्कनीयम्। ता-

दृशविशिष्टनिरूपिताधिकरणताविशेषस्य महाकालेऽसत्वेपि घटादेः घटत्वावच्छिन्ननिरूपिताधिकरणतासत्त्वेनैव सर्वाधारत्वोपपत्तेः।

अत्र केचित्। कालिकसम्बन्धेनाधारता महाकालस्य न तु सूर्यक्रियादेः, इदानीं घट इत्यादिप्रतीत्या क्रियादिरूपकालोपाधीनां महाकालनिष्ठाधारतावच्छेदकत्वस्यैवाऽवगाहनात्। अत एव तेषां कालिकविशेषणतया कालोपाधित्वप्रवादः। तादृशप्रतीतेः क्रियादावेव घटाद्याधारत्वावगाहित्वोपगमे तादृशप्रतीतीनामनुगताधारतावगाहित्वानुभवविरोधात्। कालत्वेनाखण्डोपाधिना सर्वेषां क्रियादीनामनुगमेन तादृशानुभवोपपादने महाकालस्यैवाऽप्रामणिकतापत्तेरिति प्राचीनमताभिप्रायेणेयमव्याप्त्याशङ्का। तथा च सति कालिकसम्बन्धेन महाकालान्यवृत्तित्वस्यैवाऽप्रसिद्ध्या तद्विशिष्टघटाद्यभावमादाय लक्षणगमनासम्भवात्। न च क्रियादेः कालत्वानभ्युपगमाभिप्रायेण चेदयं ग्रन्थस्तदाऽष्टद्रव्यातिरिक्तद्रव्यात्मकताया अव्यावर्तकतयाऽभिधानासङ्गतिरिति वाच्यम्। तादृशद्रव्यात्मक एव काल इति मतविशेषसूचनार्थतया तत्सङ्गतेः। तन्मात्रवृत्तित्वं च हेतोर्लक्ष्यतासंपादकत्वेना ऽभिहितम्, इतरवृत्तेर्व्यभिचारित्वात्। अथवा भवतु कालोपाधिरपि कालिकसम्बन्धेनाऽधिकरणं तदधिकरणत्वसाधकश्चेदानीं घट इत्यादिप्रत्ययो व्यवहारश्च तस्य चाननुगतोपाधिमात्रविषयकत्वे ऽनुगताधारत्वावगाहित्वानुपपत्त्या क्रियादिरूपोपाधिविशिष्टमहाकालस्य घटाद्याधारतावगाहित्वमावश्यकम्, विशिष्टे घटाद्याधारत्वावगाहित्वे विशिष्टान्तर्गतविशेषणेऽपि तदवगाहित्वमावश्यकमिति खण्डकालस्य कालिकसम्बन्धेनाधारतासिद्धिः। एवं चेदानीं महाकालान्यत्वविशिष्टो घट इति प्रत्ययः खण्डकाले विशिष्टाधारतायां मानं न त्वन्य इति तत्साधकप्रत्ययबलादेव महाकालान्यवृत्तित्वानिरूपकस्यापि महाकालस्य विशिष्टाधारत्वसिद्धिर्दुर्वारैव। तथा च महाकाले विशिष्टघटाभावोऽपि विशिष्टप्रतियोगिसमाधिकरणः तादृशप्रतीत्यनभ्युपगमे खण्डकाले न विशिष्टप्रतियोग्यधिकरणत्वप्रसिद्धिरित्युक्तस्थलेऽव्याप्तिवारणमशक्यमित्याहुः।

अन्ये तु कालिकसम्बन्धः स्वरूपादनतिरिक्तः तथा च खण्ड-

कालमहाकालानुयोगिकताद‍ृशसम्बन्धानां तत्तत्स्वरूपाणामनुगमकतावच्छेदकाभावेन प्रत्येकमेव सम्बन्धता । तथा च महाकालस्वरूपसम्बन्धेनैव घटादेः महाकालत्वादिव्यापकता वाच्येति दुरुद्धरैवाऽव्याप्तिः, ताद‍ृशसम्बन्धेन महाकालान्यवृत्तित्वस्याऽप्रसिद्धेरिति वदन्ति । तदसत् । स्वरूपाणां प्रातिस्विकरूपेण सम्बन्धत्वे यत्किञ्चित्खण्डकालनिरूपितस्वरूपसम्बन्धेन साध्यतायां ताद‍ृशखण्डकालमात्रवृत्तिहेतुकेऽपि प्रतियोगिव्यधिकरणाभावाप्रसिद्धिसम्भवान्महाकालमात्रवृत्तिहेतुकानुधावनस्य निर्बीजत्वापातात् ।

परे तु साध्यतावच्छेदकाविशिष्टसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तावेव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैयधिकरण्यप्रवेशो न तु साध्यतावच्छेदकोपलक्षितसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तौ, अन्यथा महाकाले पृथिव्यादिवृत्तित्वोपलक्षितजात्यनुमानानुपपत्तेः । ताद‍ृशसाध्यतावच्छेदके प्रतियोगितावच्छेदकाविशिष्टप्रतियोगिव्यधिकरणत्वविशिष्टाभावप्रतियोगितावच्छेदकत्वसत्त्वात् । इत्थं च यत्र साध्यतावच्छेदकोपलक्षितस्य साध्यता तत्रैवा ऽव्याप्तिशङ्कापरो ऽयं ग्रन्थः, तत्र यथाश्रुतप्रतियोगिवैयधिकरण्यस्यैव निवेशेन महाकालान्यवृत्तित्वविशिष्टघटाभावस्याऽपि लक्षणाघटकत्वादित्याहुः । तदपि न । अग्रिमविशिष्टपदोपादानतद्व्यावृत्तिप्रदर्शनविरोधात् ।

(दी०) न च ताद‍ृशसम्बन्धेन हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वमेव वक्तव्यम् । तथा चाऽवृत्तिगगनाद्यभावद्वारिकैव तत्सिद्धिः । सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चाऽवृत्तेर्नाऽतिप्रसङ्गः । भूतत्वमूर्तत्वोभयत्वाविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तु न मनोगुणादिवृत्ति, संयोगसामान्यं तु न किञ्चिद्द्रव्याऽवृत्तीति वाच्यम् । विशिष्टस्याऽनतिरिक्तत्वात् । समवायेन जातेः साध्यत्वे मेयत्वादावतिप्रसङ्गात् । जातिमन्निष्ठाभावप्रतियोगिता-

या जातित्वेनाऽनवच्छेदात्, जातिशून्ये च तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः । संयोगादिसाध्यकगुणकर्मान्यत्वादौ चाऽतिव्याप्तिः । अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेर्द्रव्ये च संयोगादेरपि वृत्तेः । मैवम् ।

(गा०) तादृशसम्बन्धेन । प्रतियोगितावच्छेदकसम्बन्धेन साध्यतावच्छेदकसम्बन्धेन वा । वक्तव्यम् । अभावविशेषणतया अभावपूर्वप्रतीकेन विवक्षणीयम् । गगनाद्यभावद्वारिकैवेति । तत्प्रतियोगिनः कालिकसम्बन्धेनाऽधिकरणाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धावपि वृत्तिमति प्रसिद्धायाः कालिकसम्बन्धेन महाकालवृत्तितया अभावस्य तत्र प्रसिद्धत्वादिति भावः ।

ज्ञानवान् सत्त्वात् संयोगी सत्त्वादित्यादौ क्रमेण सम्बन्धविशेषनिवेशनयत्किञ्चित्पदोपादानयोर्व्यावृत्तिमाह । सत्ताधिकरणकर्मादाविति। सम्बन्धविशेषानुपादाने कर्मादौ समवायेन ज्ञानाभावप्रतियोगिनोऽवृत्तावपि विषयतासम्बन्धेन ज्ञानस्य वृत्तेस्तादृशाभावो न लक्षणघटकः स्यात्, कर्मादौ संयोगाभावप्रतियोगिनोऽसत्त्वेपि हेत्वधिकरणद्रव्यवृत्तितया हेत्वधिकरणवृत्तित्वसामान्याभाववत्त्वासम्भवात् सोऽपि न तथा स्यादित्यभावान्तरमादायाऽतिव्याप्तिप्रसक्तिरिति भावः। यद्यपि यत्किञ्चित्पदस्य व्यावृत्तिर्ज्ञानसाध्यकेऽपि सम्भवति ज्ञानस्य समवायसम्बन्धेनाऽव्याप्यवृत्तितया तत्साध्यकेऽपि प्रतियोगिवैयधिकरण्यानिवेशस्यावश्यकत्वात् । तथाऽपि प्रसिद्धाव्याप्यवृत्तिसाध्यके व्यभिचारिणि संयोगी सत्त्वादित्यादौ तदनुक्तौ तत्र व्यावृत्तिर्न सम्भवतीति शङ्का स्यात् तन्निरासाय तत्प्रदर्शनम् । केचित्तु संयोगसाध्यके आदिपदग्राह्यगुणान्यत्वविशिष्टसत्ताहेतुके साध्यतावच्छेदकसम्बन्धस्यैव व्यावृत्तिप्रदर्शनपरं संयोगसामान्यस्य चेत्यपि । विषयताया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्ये सम्बन्धित्वानिवेशपक्षे पूर्वस्थलीयव्यावृत्त्यसङ्गतिरित्यस्वरसादेतदनुधावनम् । संयोगाभावस्य कालिकसम्बन्धेनैव सर्वत्र कर्मणि प्रतियोगिसामानाधिकरण्यसत्त्वा-

दतिव्याप्तिप्रसक्तिरिति वदन्ति । तदसत् । उक्तास्वरसेन पूर्वमपि ज्ञानसाध्यकं परित्यज्य स्थलान्तरानुसरणादत्र निर्बीजतादृशस्थलपरित्यागे सन्दर्भविरोधात् । आदिपदेन हेतोः साध्यस्य च विशेषशब्देनोपादानस्याऽयुक्तत्वाच्च ।

प्रतियोगितावच्छेदकविशिष्टत्वोपादानस्य पूर्वोक्तस्थले एव व्यावृत्तिं स्मारयति । भूतत्वेति । यद्यपि पूर्वं विशिष्टसाध्यकेऽतिव्याप्तिप्रदर्शनोत्तरं विशिष्टस्यातिरिक्ततापक्षे तदसङ्गतिरित्यस्वरसादुभयसाध्यकातिव्याप्तिर्दर्शिता तथाऽपि द्वन्द्वेऽल्पाक्षरस्य पूर्वनिपातनियमसत्वे उभयत्वविशिष्टान्तस्य प्रागभिधानम् । अत्र पूर्वस्थले द्वित्वाद्यवच्छिन्नप्रतियोगितायाः व्यासज्यवृत्तित्वोपगमे ऽतिव्याप्तिर्न सम्भवतीत्यस्वरसेनैव द्वितीयस्थलातिव्याप्त्यवतरणं पूर्वाभिप्रायविरोधादनुपादेयम् । न मनोगुणादिवृत्तीति । विशेष्ये शुद्धे तद्वृत्तित्वसत्वेऽपि विशिष्टे तत्र तद्वृत्तित्वाभावोऽक्षत एव । एकरूपावच्छिन्न एव तत्तदभावयोर्विरोधेनावृत्तेऽरित्यभिमानः । न चैवं विशिष्टान्तानुपादानेपि सत्तादौ विशिष्टसत्तात्वादिना गुणाद्यवृत्तित्वसत्त्वेन विशिष्टसत्ताद्यभावस्य लक्षणघटकतयाऽतिव्याप्त्यप्रसक्तेर्न विशिष्टान्तव्यावृत्तिसम्भव इति वाच्यम् । प्रतियोगिनि किञ्चिद्रूपावच्छिन्ने हेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्तित्वाभावस्य लक्षणघटकत्वे सत्तावान् द्रव्यत्वादित्यादावपि सत्तात्वाद्यवच्छिन्नाभावस्य लक्षणघटकत्वापत्त्याऽव्याप्त्यापत्तेः, हेत्वधिकरणावृत्तित्वस्य तद्वृत्तिभिन्नत्वरूपस्यैव निवेशनीयतया विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताद्यभावस्य लक्षणघटकत्वानिर्वाहेणा ऽतिव्याप्तिप्रसक्तेः । प्रतियोगितावच्छेदकविशिष्टत्वोपादाने प्रतियोगितावच्छेदकविशिष्टत्वावच्छेदेन हेत्वधिकरणवृत्तित्वात्यन्ताभावस्यैव निवेशनीयतया विशिष्टसत्ताद्यभावस्य लक्षणघटकतानिर्वाहेणाऽतिव्याप्तिवारणसम्भवाद्व्यावृत्तिसङ्गतेः । सामान्यपदप्रयोजनमाह । संयोगसामान्यं चेति । संयोगी द्रव्यत्वादित्यादौ संयोगत्वावच्छिन्नाभावप्रतियोगिन्यां यत्किञ्चित्संयोगव्यक्तौ हेत्वधिकरणयत्किञ्चिद्घटादिव्यक्त्यवृत्तित्वसम्भवेऽपि तत्प्रतियोगिसामान्ये तदसत्त्वेन तादृशाभावस्य लक्षणाघटकतया नाऽव्याप्तिरित्यर्थः ।

विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावोऽप्रामाणिक इत्याशयेन दूषयति। विशिष्टस्या ऽनतिरिक्तत्वादिति। तथा चोभयत्वादिविशिष्टस्य मूर्तत्वादेः शुद्धमूर्तत्वानतिरिक्ततया मूर्तत्वादिवृत्तेर्मनोवृत्तित्वादेरभावस्योभयत्वादिविशिष्टेऽपि तस्मिन्नसम्भवात् भूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादावतिव्याप्तिः विशिष्टान्तोपादानेऽपि दुर्वारैवेतिभावः। न च भूतत्वमूर्तत्वोभयं न मनसि, गुणान्यत्वविशिष्टसत्ता न गुणे इत्यादिसर्वानुभवसिद्धप्रतीतिबलादुभयत्वविशिष्टसत्तात्वाद्यवच्छिन्ने मनोगुणादिवृत्तित्वाभावसिद्धेरावश्यकत्वान्नातिव्याप्तिरिति वाच्यम्। तादृशप्रतीत्या मनोगुणाद्यधिकरणकवृत्तित्वावच्छिन्नविशिष्टसत्तात्वावच्छिन्नाभावस्यैवाऽवगाहनात्। जातौ न किञ्चित्समवैतीति निश्चयदशायां जातौ न भूतत्वमूर्त्तत्वोभयं न वा विशिष्टसत्तेति प्रतीतिवत् मनसि गुणे न किञ्चित्समवैतीति भ्रमदशायामपि तादृशप्रतीतेरानुभविकतया मनोगुणादिसमवेतत्वाभावस्य तद्विषयत्वासम्भवेन मनोगुणाद्यधिकरणकाभावस्य तद्विषयताया आवश्यकत्वात्तादृशभ्रमाभावकालीनतथाकारकप्रतीतावपि तस्यैव विषयत्वौचित्यात्, अन्यथा कल्पनागौरवापत्तेः। भूतत्वमूर्त्तत्वोभयं न मनोवृत्ति गुणान्यत्वविशिष्टसत्ता न गुणवृत्तिरित्यादिप्रत्ययश्च तादृशोभयत्वविशिष्टसत्तात्वादौ मनोगुणादिवृत्तित्वावच्छेदकत्वाभावं तादृशवृत्तित्वे तादृशोभयत्वविशिष्टसत्तात्वावच्छेद्यत्वाभावं वाऽवगाहते तादृशाभावस्य क्लृप्तत्वात्। न च यत्किञ्चिद्धेत्वधिकरणवृत्तितानवच्छेदकस्वप्रतियोगितावच्छेदककत्वमेव विवक्षणीयम्, उभयत्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकोभयत्वादेश्च मनोगुणादिवृत्तिताद्यनवच्छेदकत्वात्तादृशाभावसंग्रहेण नातिव्याप्तिरिति वाच्यम्। गुणान्यत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्य वैशिष्ट्यसहितसत्तात्वस्य गुणादिवृत्तितावच्छेदकशुद्धसत्तात्वाद्यनतिरिक्ततया तदनवच्छेदकत्वासम्भवेनोक्तविवक्षयाऽपि तादृशाभावसंग्रहासम्भवात्। यदभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकत्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तताविरहस्तादृशाभावनिवेशे दर्शितातिव्याप्तिपरिहारः स्यात् इत्याशङ्क्य दूषणान्तरमाह। समवायेनेति। जातिमन्निष्ठतादृशाभावेति। जातिमन्निष्ठो यो घटत्वा-

द्यभावस्तस्यैव पटाद्यसमवेतप्रतियोगिकत्वेन तत्तत्प्रतियोगितायां जातित्वस्याऽनवच्छेदकत्वादिति भावः । जातिमदवृत्तेर्जातित्वावच्छिन्नाभावस्य तादृशत्वं न सम्भवतीति स्फुटयति । जातिशून्येति । तादृशसम्बन्धेन समवायसम्बन्धेन । अप्रसिद्धेरिति । तथा च जातिमदवृत्तिर्यो ऽभावस्तत्प्रतियोगिसामान्ये हेतुमद्यत्किञ्चित्पदेन जातिशून्यमेवोपादायाऽवृत्तित्वान्तं घटनीयं तच्च न सम्भवति प्रतियोग्यप्रसिद्ध्या तदप्रसिद्धिरिति नाऽसौ लक्षणघटक इति भावः । जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यस्य प्रयोजनविरहेणाऽप्रवेशेनोक्तदोषानवकाश इत्यव्याप्यवृत्तिसाध्यके एवाऽतिव्याप्तिमाह । संयोगादीति । अतिव्याप्तिरिति । संयोगत्वावच्छिन्नाभावस्य हेत्वधिकरणयत्किञ्चिद्व्यक्त्यसमवेतप्रतियोगिसामान्यकत्वाभावेन लक्षणाघटकत्वादिति । तदसम्भवमेव स्फुटयति । अद्रव्य इति । हेतुमतीति—सामान्यादावित्यर्थः । अप्रसिद्धेरिति । तथाच यत्किञ्चिद्व्यक्तीत्यनेन न सामान्याद्युपादानसम्भव इति भावः । द्रव्ये च संयोगादेरपीति । तथा च द्रव्यमपि किञ्चित्पदेनोपादाय तादृशाभावस्य तथात्वं न शक्योपपादनमिति भावः ॥

(दी०) साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाऽभावस्य विवक्षितत्वात् । धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगिकत्वस्य, चैत्रान्यत्वविशिष्टतद्दण्डसंयोगे एतद्दण्डाधिकरणचैत्रानुयोगिकत्वस्य, गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः ॥

(गा०) साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावस्य विवक्षितत्वादिति योजना । तथा च स्वप्रतियोगितावच्छेदकाविशिष्टप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वमभावे, स्वप्रतियोगितावच्छेदकेत्यत्र स्वावच्छेदकत्वं प्रक्षिप्य तादृशोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वं प्रतियोगितायां वा विशे-

षणं देयमिति भावः । जलादिसंयोगे वह्न्यादिप्रतियोगिकत्वधूमवदनुयोगिकत्वोभयाभावसत्वेऽपि साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गततत्तद्धूमाऽधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्वतदधिकरणानुयोगिकत्वोभयाभावासत्त्वान्न वह्न्यभावस्य लक्षणघटकतेति घटाभावमादायैव वन्हिमान्धूमादित्यादौ लक्षणसमन्वयः । घटवान्महाकालत्वादित्यादौ पुनरवृत्तिगगनादेरभाव एव लक्षणघटकः, कालिकसम्बन्धसामान्ये तत्तत्प्रतियोगिकत्वाभावेनोभयाभावसौलभ्यात् । यत्किञ्चिद्धेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावनिवेशे जातिमान्मेयत्वादित्यादावुक्तातिव्याप्तिवारणमशक्यम् । सामान्यानुयोगिकसमवायाऽप्रसिद्ध्या जात्याश्रयानुयोगिकसमवाये च जात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणत्वानुपपत्तेः । एवं निरुक्तप्रतियोगिप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावनिवेशे घटवान्महाकालत्वादित्यादावव्याप्तिवारणमशक्यम, गगनत्वविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेर्गगनाभावस्याऽपि प्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुसरणम् । यत्किञ्चित्पदप्रयोजनमाह । धूमसंयोगे इति । अयोगोलकानुयोगिकत्वस्य विरहान्नातिप्रसङ्ग इत्यनेनाऽन्वयः । साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतधूमसयोगे धूमप्रतियोगिकत्ववन्हिमदनुयोगिकत्वोभयोरेव सत्त्वेन तत्सामान्ये उभयाभावस्य दुर्घटत्वाद्यत्किञ्चित्पदानुपादाने धूमवान्वह्नेरित्यादावतिव्याप्तिः स्यात् । हेत्वधिकरणस्य हेतुमत्त्वेन न निवेशः किन्तु तत्तद्व्यक्तित्वेन यत्किञ्चिदेकहेतुमद्व्यक्तेर्निवेश इत्येतल्लाभाय तदुपादाने पुनर्हेत्वधिकरणायोगोलकानुयोगिकत्वस्य धूमसंयोगे ऽभावादन्यसंयोगे च धूमप्रतियोगिकत्वस्याऽभावात् संयोगसामान्यस्यैवोभयाभाववत्वाद्धूमत्वावच्छिन्नाभावोऽपि लक्षणघटक इति नातिप्रसङ्ग इत्यर्थः । प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदोपादानप्रयोजनं संयोगेन चैत्रान्यत्वविशिष्टैतद्दण्डत्वेनैव चैत्रादिनिष्ठैतद्दण्डसाध्यके एतद्दण्डहेतौ, समवायेन विशिष्टसत्तासाध्यके जातिरूपहेतौ चाऽतिव्याप्तिवारणरूपं दर्शयति । चैत्रान्यत्वेति । निरुक्तपदानुपादाने

संयोगसामान्यान्तर्गतचैत्रनिष्ठतद्दण्डसंयोगे हेत्वधिकरणचैत्रानुयोगिकत्वचैत्रान्यत्वविशिष्टतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्वयोः, समवायसामान्यान्तर्गतगुणानुयोगिकसत्तासमवाये च हेत्वधिकरणगुणानुयोगिकत्वविशिष्टसत्ताभावप्रयोगिसत्ताप्रतियोगिकत्वयोर्द्वयोरेव सत्त्वेन तादृशाभावस्य लक्षणघटकता न स्यादिति प्रसक्तातिप्रसक्तेस्तदुपादानान्नावकाशः। चैत्रे गुणादौ च संयोगेन समवायेन च विशिष्टदण्डविशिष्टसत्तावैशिष्ट्याप्रत्ययात्तदनुयोगिकसंयोगसमवाययोर्विशिष्टदण्डत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिकत्वानभ्युपगमेनाऽन्यानुयोगिकयोश्च तयोश्चैत्रगुणाद्यनुयोगिकत्वाभावेनोभयाभावस्याऽक्षततया विशिष्टसाध्याभावस्याऽपि लक्षणघटकत्वादित्यर्थः।

अथाऽत्र संयोगेन घटादौ साध्ये घटत्वादिहेतावतिव्याप्तिः संयोगसामान्यान्तर्गतघटादिसंयोगे घटाद्यनुयोगिकत्वघटादिप्रतियोगिकत्वोभयसत्त्वेन घटादिनिष्ठघटाद्यभावस्य लक्षणाघटकत्वात्। न च स्वस्मिन् संयोगेन स्वविशिष्टबुद्ध्यनुदयात् अन्यत्र विशिष्टबुद्धिनियामकघटसंयोगे घटप्रतियोगिकत्वमात्रम्, घटे ऽन्यविशिष्टधीमात्रनियामकसंयोगे च तदनुयोगिकत्वमात्रमिति घटानुयोगिकत्वतत्प्रतियोगिकत्वोभयं न कुत्रापि संयोगे ऽस्ति, न हि समवायेन संयोगाधिकरणत्वमेव संयोगानुयोगित्वं येन घटसमवेतसंयोगमात्रस्यैव घटानुयोगिकत्वं स्यात्। तथा सति तत्सम्बन्धानुयोगिताया एव तद्विशिष्टबुद्धिविषयताप्रयोजकत्वेन स्वस्मिन्नपि स्वविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वात्, किन्तु सम्बन्धान्तरमेवेति वाच्यम्। येन सम्बन्धेन घटे ऽन्यविशिष्टधीस्तेन सम्बन्धेना ऽन्यत्र कदाचिद्घटविशिष्टबुद्धिजननादेकत्रैव संयोगे घटानुयोगिकत्वघटप्रतियोगिकत्वयोरुभयोरेवावश्यकत्वात्। यस्मिन्सम्बन्धे यत्प्रतियोगिकत्वविशिष्टे यदनुयोगिकत्वं तत्सम्बन्धेन तस्यैव तद्विशिष्टप्रमितेः। स्वप्रतियोगिकत्वविशिष्टे च संयोगे स्वानुयोगिकत्वानुपगमेन स्वस्मिन् तेन सम्बन्धेन स्वविशिष्टप्रमापत्त्यनवकाशात् इति चेन्न। संयोगेनाऽधिकरणांशे आधेयस्यैव विशिष्टबुद्धिर्जन्यते नत्वाधेयांशे, आधाराधेयभावानापन्नयोर्वृत्त्यनियामकसंयोगिनोश्च संयोगेन वि-

शिष्टबुद्धेरप्रामाणिकत्वात् । आधेयत्वानुपस्थितिकालीने भूतले घट इत्यादिप्रत्यये घटाद्यंशे भूतलादेः प्रकारत्वेऽपि आधेयताया एव संसर्गतोपगमात्, न तु संयोगस्य । एवं सति वृत्यनियामकस्य गगनादिसंयोगस्य सम्बन्धत्वानुपपत्तिः विशिष्टबुद्धिनियामकस्यैव तथात्वादिति चेत् का क्षतिः । एवं च येन संयोगेना ऽन्यत्र घटादिविशिष्टबुद्धिर्जन्यते घटस्य तत्संयोगाश्रयानाधारत्वेन घटे न तेन सम्बन्धेना ऽन्यविशिष्टबुद्धिर्जन्यते इति संयोगमात्र एव तत्प्रतियोगिकत्वतदनुयोगिकत्वोभयाभावस्याऽक्षतत्वात् ।

अथ यस्य घटस्याऽधःस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव च संयोगेन पटेन समं परिवृत्य स्थापिते तद्धटे पटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटप्रतियोगिकत्वघटानुयोगिकत्वोभयस्यावश्यकतया संयोगेन घटसाध्यके तद्धटतत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिर्दुर्वारैवेति चेत्। एवं सति साध्यतावच्छेदकसम्बन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वहेत्वाधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभाव एव विवक्षणीयः । स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायामसत्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वतद्धटनिष्ठत्वोभयाभावो ऽक्षत एवेति। एवं च यदेतत्कल्पे समवायैक्यमते ऽतिव्याप्तिमुद्भावयिष्यति तद्यथाश्रुताभिप्रायेणेति ध्येयम्।

अथ द्रव्यत्वादिकं प्रति पर्याप्तिसम्बन्धेन द्वित्वादेर्व्यापकत्वापत्तिः। हेतुमत एकैकद्रव्यस्य पर्याप्तिसम्बन्धेन द्वित्वाद्यनधिकरणत्वेऽपि द्वित्वादिपर्याप्तौ हेत्वधिकरणतत्तद्व्यक्त्यनुयोगिकत्वाभावासत्वादिति द्रव्यत्वादिना पयाप्तिसम्बन्धेन गगनादौ द्वित्वाद्यनुमानापत्तिः । न चेष्टापत्तिः, एकविशेष्यकपर्याप्तिसंसर्गकव्यासज्यवृत्तिधर्मप्रकारकबुद्धेर्भ्रमतया सल्लिङ्गकपरामर्शात्तादृशानुमित्युपगमासम्भवात् । न चैकमात्रवृत्तिधर्मावच्छेदेन द्वित्वादिपर्याप्तेरेकैकस्मिन्नसत्त्वेऽपि उभयादिवृत्तिधर्मावच्छेदेन तत्पर्याप्तिसत्वात्तेन सम्बन्धेन तद्वति तत्प्रकारकत्वरूपप्रमात्वं दुर्वार-

मिति वाच्यम् । तद्व्यावृत्तप्रमालक्षणस्याऽपि कथञ्चिन्निर्वचनसम्भवादिति चेन्मैवम् । उद्देश्यतावच्छेदकानातिरिक्तवृत्तित्वाविशेषितपर्याप्तेः क्वचिदपि सम्बन्धत्वानभ्युपगमेन तादृशपर्याप्तिसंसर्गकानुमितेरापादनासम्भवात् । गगनत्वाद्यनातिरिक्तवृत्तित्वविशेषितपर्याप्तेर्द्वित्वादिप्रतियोगिकत्वाभावेन द्वित्वादिनिष्ठव्यापकत्वाघटकतया तादृशसम्बन्धेनापि तदनुमित्यापत्त्यनवकाशात् ।

यत्तु हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वस्थले हेतुमत्त्वपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वन्निवेश्यम् । द्वित्वादिपर्याप्तौ च द्रव्यत्वादिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वविरहान्न तेन सम्बन्धेन द्वित्वादेर्द्रव्यत्वादिरूपप्रत्येकपर्याप्तधर्मव्यापकतापत्तिः । हेतुमद्वृत्तियत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वनिवेशे इमे बहवस्त्रित्वादित्यादौ पर्याप्तिसम्बन्धेन हेतुसाध्यभावेऽव्याप्तिः हेतुमदेकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वस्य बहुत्वादिपर्याप्तावसत्त्वेन तादृशसाध्याभावे निरुक्तप्रतियोगिवैयधिकरण्यस्य दुर्वारत्वात् अतो हेतुपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मनिवेश इति । तन्न मनोरमम् । एतादृशरीत्या उक्तकल्पपरिष्कारेऽपि प्रतियोगिमद्भेदे हेतुपर्याप्त्यवच्छेदकावच्छिन्नानुयोगिताकत्वस्याऽग्रिमकल्पे विवक्षणे आकाश आकाशघटोभयत्वादित्यादौ अतिव्याप्तेर्दुर्वारत्वात् आकाशत्वाद्यवच्छिन्नभेदस्य दर्शितहेतुपर्याप्त्यवच्छेदकतदुभयवृत्तिधर्मावच्छिन्ने ऽसत्त्वात्, प्रतियोगिवृत्तिधर्मस्य भेदाधिकरणतानवच्छेदकत्वात् । न च व्यासज्यवृत्तिधर्मसाध्यके ईदृशी रीतिरुपादेयां नाऽन्यत्रेति वाच्यम् । आकाशत्वादेराकाशघटादौ व्यासज्यवृत्तित्वभ्रमदशायां तदवच्छिन्नभेदस्य प्रत्येकं हेत्वधिकरणवृत्तित्वग्रहेऽपि आकाशघटोभयत्वादिहेतुना आकाशत्वाद्यनुमित्युत्पत्त्या तन्निर्वाहाय तत्राऽपि साधनपर्याप्त्यवच्छेदकावच्छिन्नाधिकरणताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञानहेतुताया वाच्यतया तत्राप्यनुमित्यौपयिकव्याप्तिप्रसिद्ध्यापत्तेः तस्माद्द्वित्वादिसाध्यकद्रव्यत्वाकाशत्वादिकं सद्धेतुरेव । इमे बहवस्त्रित्वादित्यादावव्याप्तिवारणाय च पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतियोग्यधिकरणत्वावच्छिन्नस्य भेद एव हेतुमति निवेशनीयो न तु प्रतियोग्यवच्छिन्नभेदः प्रतियोगिमद्वृत्तिधर्मवत्त्वं वा तेन

प्रत्येकवृत्तिबहुत्वाद्यवच्छिन्नभेदमादाय न तदभावस्य प्रतियोगिवैयधिकरण्यमित्येव सारम् ।

इदं तु बोध्यम् । साध्यतावच्छेदकावच्छिन्नाभावनिरूपितत्वविशिष्टसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वमेव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणेति प्रतीकार्थः । महाकालो घटवान् महाकालत्वादौ च नैतादृशविशेषणाक्रान्ताभावाप्रसिद्धिः कालिकसम्बन्धावच्छिन्नपटाद्यभावस्यैव तथात्वात् । हेतुमन्निष्ठतदधिकरणतायाः साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदसत्त्वात् इत्युभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधितिकृतामफलमेव । एवं च प्रतियोगिवैयधिकरण्यस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिक्रमेण निर्वचने ऽननुगमात् तत्तत्प्रातियोगितावच्छेदकत्वाभावकूटनिवेशने व्याप्तेदुर्ज्ञेयतेति दूषणान्तरमनवकाशमिति दिक् ॥

ननु गगनादेरपि कालिकसम्बन्धेन कालवृत्तित्वमावश्यकम्, अन्यथा तेषां परमार्थसत्त्वानुपपत्तिस्तस्य कालवृत्तित्वरूपत्वात् एवं कारणत्वानुपपत्तिश्च तस्य पूर्वकालवृत्तित्वघटितत्वात् अवृत्तित्वप्रवादश्च तत्र कालिकातिरिक्तसम्बन्धेना ऽवृत्तित्वपरः । इत्थं च कालिकसम्बन्धसामान्ये गगनादिप्रतियोगिकत्वमहाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकरण्यं दुर्घटम् । एवं स्वरूपसम्बन्धेन गगनादेरवृत्तित्वपक्षेऽपि विषयितया घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, विषयितासम्बन्धेन पदार्थमात्रस्यैव हेत्वधिकरणनित्यज्ञानसम्बद्धत्वात् तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरित्यालोच्य कल्पान्तरमाह—स्वरूपेत्यादिना ।

अत्र केचित् । साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसाध्यप्रतियोगिकत्वैतत्त्रित्वावच्छिन्नाभावस्य विवक्षणान्न विषयितासम्बन्धेन घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, पटाद्यभावस्यैव तेन सम्बन्धेन प्रतियोगिव्यधिकरणत्वात् । घटपटविषयित्वयोर्भिन्नत्वेन विषयितासम्बन्धसामान्ये तादृशत्रित्वावच्छिन्नाभावस्य सत्त्वात् । न चैतत्त्रित्वावच्छिन्नाभावनिवेशे स्व-

रूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वेऽपि न घटादिसाध्यककालत्वादिहेतावव्याप्तिः, प्रतियोगिभेदेन कालिकसम्बन्धस्यापि विभिन्नतया गगनाद्यभावस्यैव तादृशप्रतियोगिव्याधिकरणत्वादिति वाच्यम् । कालिकसम्बन्धेन प्रमेयसामान्यसाध्यकस्थले ऽव्याप्तेः, तत्र सर्वस्यैव साध्यतया कालिकसम्बन्धसामान्ये एव साध्यप्रतियोगिकत्वसत्त्वेनोपदर्शितत्रित्वावच्छिन्नाभावस्याऽसत्त्वात् । प्रमेयसामान्यस्य व्याप्यवृत्तित्वेऽपि तस्या ऽव्याप्यवृत्तित्वभ्रमदशायामनुमित्युपपत्त्यर्थं तत्र प्रतियोगिव्यधिकरणत्वघटितव्याप्त्युपपादनस्यावश्यकत्वात् । एतत्क्षणवृत्तित्वविशिष्टप्रमेयसामान्यसाध्यकमहाकालत्वादिहेतोरव्याप्यवृत्तिसाध्यकत्वेन तत्राव्याप्तेश्च । न च तथाऽपि विषयितासम्बन्धेन प्रमेयसामान्यसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः सम्भवात्कथं त्वदुक्तिसङ्गतिरिति वाच्यम् । साध्यप्रतियोगिकत्वेत्यनेन साध्यतावच्छेदकविशिष्टप्रतियोगिकत्वस्य विवक्षणात् प्रमेयत्वविशिष्टघटविषयितातो घटत्वविशिष्टघटविषयिताया भिन्नत्वेन घटाद्यभावस्य प्रतियोगिव्याधिकरणत्वात् । न चेश्वरज्ञानीयप्रमेयत्वविशिष्टघटविषयितायां तादृशत्रित्वावच्छिन्नस्य सत्त्वेन कथं तत्र घटाद्यभावस्य प्रतियोगिवैयाधिकरण्यमिति वाच्यम् । निरुक्तप्रतियोगिप्रतियोगिकत्वेत्यनेन यदभावीयप्रतियोगितावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वस्य विवक्षणादीश्वरज्ञानीयतादृशविषयितायां प्रमेयत्वस्याऽपि निरूपकतावच्छेदकत्वेन घटत्वपर्याप्तप्रतियोगितावच्छेदकताकत्वाभावेन घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वात् । इत्थं च स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे कालिकसम्बन्धेन घटादिसाध्यकस्थले ऽप्यव्याप्तिः सम्भवति. प्रमेयत्वादिविशिष्टघटनिरूपितकालिकविशेषणतातो घटत्वविशिष्टघटनिरूपितकालिकविशेषणताया अभिन्नत्वेन कालिकसम्बन्धसामान्ये घटत्वपर्याप्तावच्छेदकताकत्वाभावेन घटाद्यभावस्यापि प्रतियोगिव्यधिकरणतया तत्प्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वात् इदानीं प्रमेयघटः इदानीं घट इत्यादिप्रत्ययानामेकेनैव कालिकविशेषणत्वेनोपपत्तेर्निरूपकतावच्छेदकभेदेन तादृशसम्बन्धभेदस्या ऽनभ्युपगमादतः कल्पान्तरमनुसरति–स्वरूपसम्बन्धेनेतीत्याहुः । तदसत् । तथा

सति स्वरूपसम्बन्धेन गगनादेरवृत्तित्वेऽपि विषयितासम्बन्धेन घटादिसाध्यके प्रमेयत्वविशिष्टघटादिमात्रविषयकज्ञानमात्रवृत्तिहेतावतिव्याप्तेः। स्वरूपसम्बन्धेन गगनादेरवृत्तित्वेऽपि नित्यज्ञानीयप्रमेयत्वादिशिष्टघटनिरूपितविषयितातो नित्यज्ञानीयघटत्वविशिष्टनिरूपितविषयिताया अभिन्नत्वेऽपि क्षतिविरहेण विषयितासम्बन्धेन घटादिसाध्यके ईश्वरज्ञानमात्रवृत्तिहेतावव्याप्तेर्दुर्वारत्वाच्च।

एतेन साध्यतावच्छेदकविशिष्टप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तोभयाभावस्य विवक्षणान्न घटवान्नित्यज्ञानत्वादित्यादावप्यव्याप्तिः, तत्र घटत्वविशिष्टनिरूपितविषयितासामान्ये पटप्रतियोगिकत्वाभावेन पटाभावस्यापि प्रतियोगिव्यधिकरणत्वात्। स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु घटवान्महाकालत्वादित्यादावुक्तक्रमेण पर्याप्तिनिवेशस्याऽऽवश्यकतया घटाभावस्याऽपि-प्रतियोगिव्यधिकरणतया ऽव्याप्तिरतः कल्पान्तरानुसरणमित्यपि परास्तम्। उक्तस्थले साध्यनिरूपितविषयितासम्बन्धसामान्यान्तर्गतप्रमेयत्वविशिष्टघटनिरूपितविषयितायां घटत्वपर्याप्तावच्छेदकताकत्वाभावेन शुद्धघटत्वविशिष्टनिरूपितविषयितायां च हेत्वधिकरणानुयोगिकत्वाभावेन साध्यनिरूपितविषयितासामान्ये उभयाभावस्य सत्त्वादव्याप्तेः। तस्मात्प्राचीनमते वृत्त्यनियामकविषयितादिसम्बन्धेन व्याप्त्यनभ्युपगमादुक्तस्थले ऽव्याप्त्यसम्भवात्। कालिकसम्बन्धेन गगनादेरवृत्तित्वे तु घटवान् महाकालत्वादित्यादावव्याप्तिरतः कल्पान्तरमनुसरति॥

(दी०) स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्। समवायसम्बन्धेन प्रमेयसामान्याभावस्य सामान्यादौ सत्त्वान्मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम्।

(गा०) स्वरूपसम्बन्धेन—कालिकविशेषणतासम्बन्धेन। निरुक्तप्रतियोग्यनधिकरणेति। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छे-

दकावच्छिन्नानधिकरणेत्यर्थः । एवं च स्वावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववत्तादृशप्रतियोगितासामान्यको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नविधेयकानुमित्यौपयिकी व्याप्तिरिति पर्यवसितम् । घटवान्महाकालत्वादित्यादौ समवायादिना घटाद्यभावीयप्रतियोगितैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिरूपिका प्रसिद्धा, तादृशप्रतियोगितासामान्ये कालिकसम्बन्धावच्छिन्नत्वाभावादेव निरुक्तोभयाभाववत्त्वमक्षतमिति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ संयोगादिना घटाद्यभावप्रतियोगितायां समवायादिना धूमाद्यभावप्रतियोगितायां च धूमत्वाद्यवच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाभावप्रतियोगिताया अपि निरुक्तप्रतियोगितासामान्यान्तर्गतत्वेन तत्रोभयाभावासत्त्वान्नातिव्याप्तिः । धूमादिसमानाधिकरणस्य समवायादिना वह्न्याद्यभावस्य संयोगादिना घटाद्यभावस्य च प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वयोरेकैकस्य सत्त्वेऽप्येकैकाभावेन द्वित्वावच्छिन्नाभावसत्त्वाल्लक्षणसमन्वयः ।

यद्यपि तादृशाभावीयसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमात्रस्याऽभावनिवेशेऽपि सामञ्जस्यम् । इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वावच्छिन्नभेदादिप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विरहमादाय, प्रमेयसामान्यसाध्यके संयोगेन जन्यत्वविशिष्टघटादिहेतौ साध्यतावच्छेदकावच्छिन्नभेदस्य संयोगसमवायकालिकविशेषणतासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य च हेतुमत्यसम्भवेऽपि विषयितासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य, ज्ञानमात्रवृत्तिहेतौ च संयोगसम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य तद्वतिप्रसिद्ध्या तदीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायामुक्तसम्बन्धावच्छिन्नत्वस्य विरहमादाय लक्षणसमन्वयसम्भवः । तथाऽपि हेतुमति सर्वैरेव सम्बन्धैः साध्यं वर्तते न तु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिति भ्रमदशायामप्यनुमितेरानुभविकतया तदानीं साध्यतावच्छेदकावच्छिन्नत्वेन तादृशाभा-

वप्रतियोगित्वज्ञानासम्भवात्तद्विशेषितप्रतियोगिताधर्मिकसम्बन्धविशेषावच्छिन्नत्वाभावज्ञानस्याऽनुमितिहेतुता न सम्भवतीत्युभयाभावानुसरणम् ।

वस्तुतस्तु अभावज्ञानज्ञानत्वान्यतमवान्योगिज्ञानत्वादित्यादावव्याप्तिर्बोध्या । तत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वाप्रसिद्धेः । एवं निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासामान्ये निरुक्तधर्मावच्छिन्नत्वाभावनिवेशे कालो घटवानित्यादावव्याप्तेरपरिहारो बोध्य इति ।

प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्या तदवच्छिन्नत्वमप्यप्रसिद्धमिति शङ्कां परिहरति । समवायेनेति । यद्यपि विषयतादावपि तदवच्छिन्नत्वप्रसिद्धिसम्भवस्तथाऽपि विषयतादिनिष्ठायास्तत्प्रकारकत्वादिरूपतदवच्छेद्यतायाः प्रतियोगितानिष्ठाया अन्यूनानतिरिक्तवृत्त्यगुरुधर्मनिरूपितविलक्षणावच्छेद्यतायाश्च एकजातीयत्वस्याऽप्रामाणिकत्वेनाऽतिव्याप्तिभयेन प्रतियोगितायां यादृशमवच्छिन्नत्वं तस्यैव लक्षणे निवेशः कार्य इत्यभिप्रायेण तादृशावच्छिन्नत्वस्यैव प्रसिद्धिर्दर्शिता । अन्यत्सर्वं स्वयमूह्यम् ।

पूर्वकल्पे दोषान्तरमपि दर्शयति । अत एवेति । पूर्वकल्पं परित्यज्यैतत्कल्पावलम्बनादेवेत्यर्थः । समवायस्योभयवत्त्वे हेतुः, एकत्वेनेति । उभयवत्त्वेपीत्यनेन द्रव्यत्वाभावे हेत्वधिकरणगुणादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यासम्भवः सूचितः । द्रव्यं जातेरित्यादाविति । नाऽतिव्याप्तिरित्यग्रिमेणाऽन्वयः । यद्यपि प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं प्रतियोगिनिरूपिततादृशसम्बन्धाननुयोगित्वम् । अधिकरणतानिवेशे तादात्म्येन साध्यतायां व्यभिचारिण्यतिव्याप्तेः, तथा च समवायैक्ये गुणादेरपि द्रव्यत्वप्रतियोगिकसमवायानुयोगिता निष्प्रत्यूहैवेत्येतत्कल्पेऽपि समवायेन द्रव्यत्वाभावस्य लक्षणघटकत्वानिर्वाहः तथाऽपि स्वप्रतियोगिप्रतियोगिकत्वविशिष्टतादृशसम्बन्धानिरूपितविलक्षणानुयोगिताया एव निवेशनीयतया गुणादिनिष्ठसमवायानुयोगितायाश्च द्रव्यत्वीयविशिष्टानिरूपितत्वेन न दोषः । वस्तुतः

स्वप्रतियोगितावच्छेदकसम्बन्धेन विशिष्टप्रतियोग्यवच्छिन्नभेदो हेतुमद्विशेषणम्। एवं च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व-विशिष्टसम्बन्धानुयोगिन्येव भेदाभ्युपगमात्समवायैक्यमतेऽपि समवायेन द्रव्यत्वाद्यवच्छिन्नभेदस्य गुणादावक्षतत्वाद् द्रव्यत्वाद्य-भावस्य गुणादौ समवायेन प्रतियोगिवैयधिकरण्यमव्याहतमेवेति ।

इदमत्रावधेयम्। समवायकालिकविशेषणताद्युभयसम्बन्धेन यत्र द्रव्यत्वादेः साध्यता केवलसमवायादिना द्रव्यत्वादेर्हेतुता तत्र साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतगगनानुयोगिकसमवायादा-वुक्तोभयाभावासत्त्वेनाऽतिव्याप्तिः समवायभेदमतेऽपि दुर्वारा । साध्यतावच्छेदकसम्बन्धतावच्छेदकरूपविशिष्टनिरूपितानुयोगिता-सामान्ये निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वहेत्वधिक-रणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणेन तादृशदोषवारणे च निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वस्थाने निरुक्त-प्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वनिवेशेन द्रव्यं जा-तेरित्यादावप्यतिव्याप्तिः शक्यते वारयितुमिति ।

इदं त्ववधेयम् । स्वसमवायिसंयोगादिसम्बन्धेन यत्र लौहि-त्यादेः साध्यता तत्र सद्धेतावेतत्स्फटिकत्वादावुभयाभावघटित-प्रतियोगिवैयधिकरण्यनिवेशपक्षे स्फटिकाद्यनुयोगिकजपादिसंयोगे लौहित्यादिनिरूपितपरम्परासम्बन्धघटकसाक्षाल्लौहित्यप्रतियोगिक-त्वाभावेन हेतुमन्निष्ठसाध्याभावे प्रतियोगिवैयधिकरण्यं दुर्वारम् । साक्षात्परम्परासम्बन्धघटकसाधारणं तत्प्रतियोगिकत्वं चानुगतं दुर्वचम् । तादृशस्य तस्य निवेशे ऽयोगोलकाद्यनुयोगिकवह्निसंयो-गादेरपि धूमादेः परम्परासम्बन्धघटकत्वसम्भवेन धूमादिप्रतियो-गिकतया तन्निष्ठधूमाद्यभावेऽपि प्रतियोगिवैयधिकरण्यानुपपत्तेः । न च तादृशसंयोगे संयोगत्वपुरस्कारेण साक्षाल्लौहित्यप्रतियोगिकत्व-विरहेऽपि साध्यतावच्छेदकसम्बन्धतावच्छेदकस्वसमवायिसंयो-गत्वपुरस्कारेण तत्प्रतियोगिकत्वं स्वीक्रियते इति वाच्यम् । माना-भावात्, समवायस्य तत्प्रतियोगिकतयैव तद्घटितपरम्परायाः सम्बन्धतोपपत्तेः । किञ्चिद्रूपेणाऽपि संयोगादेर्लौहित्यादिप्रतियो-गिकत्वे संयोगादिना किञ्चित्समवायिनिरूपितत्वविशिष्टसंयोगा-दिना वा साक्षात्सम्बन्धात्मकेन स्फटिकादौ लौहित्यादिबुद्धेर्भ्र-

मत्वानुपपत्तेश्च । यादृशसम्बन्धे यत्प्रकारप्रतियोगिकत्वयद्विशेष्याऽनुयोगिकत्वोभयाभावस्तादृशसम्बन्धेन तत्प्रकारकतद्विशेष्यकज्ञानं भ्रम इति तल्लक्षणात् । स्वसमवायिसंयोगे चोभयसत्त्वेनोभयाभावासत्त्वात् । न च सम्बन्धभेदेन व्यापकताभेदात्स्वसमवायिसंयोगादिरूपपरम्परासम्बन्धेन यत्र साध्यता तत्र परम्पराघटकविशेष्यांशे स्वप्रतियोगिप्रतियोगिकत्वमुपेक्ष्य स्वप्रतियोगिप्रतियोगिकपरम्पराघटकविशेषणसमवायादिमत्प्रतियोगिकत्वस्यैवाऽभावो निवेशनीयः । परम्पराभिवृद्धावपि ईदृशरीत्योह्यमिति नानुपपत्तिरिति वाच्यम् । यत्र कालिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन घटादिकं साध्यं महाकालवृत्तित्वादिकं हेतुस्तत्र कालिकसम्बन्धेन गगनादेरवृत्तित्वपक्षे प्रतियोगिव्यधिकरणाभावाप्रसिद्धेर्दुर्वारत्वात् । गगनादिनिरूपितस्य तादृशसामानाधिकरण्यरूपपरम्परासम्बन्धघटकविशेषणांशस्य कालिकसम्बन्धस्याऽप्रसिद्धेः । विशेषणीभूतसम्बन्धं विशिष्यानिवेश्य निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धत्वेन सम्बन्धं निवेश्य तद्वत्प्रतियोगिकत्वनिवेशे कालिकविशेषणतावत्समवेतत्वरूपपरम्परासम्बन्धेन द्रव्यत्वादिसाध्यके द्रव्यवृत्तित्वादिहेतावतिव्याप्तिः, तत्र साध्यतावच्छेदकपरम्परासम्बन्धघटकविशेष्यीभूतसमवेतत्वांशे व्यभिचारनिरूपकाधिकरणशब्दज्ञानाद्यनुयोगिकत्वद्रव्यत्वप्रतियोगिकसम्बन्धत्वावच्छिन्नद्रव्यत्वसमवायवत्प्रतियोगिकत्वोभयसत्त्वेन द्रव्यत्वाभावासङ्ग्रहात् । हेत्वधिकरणानुयोगिकविशेष्यीभूतसम्बन्धप्रतियोग्यनुयोगिकत्वनिरुक्तप्रतियोगिप्रतियोगिकत्वोभयाभावस्य परम्परासम्बन्धघटकविशेषणांशे निवेशे स्वसमवायिसमवेतत्वसम्बन्धेन जातिसाध्यकमेयत्वादिहेतावतिव्याप्तिः, तत्र तादृशसम्बन्धघटकविशेषणांशे तादृशसम्बन्धेन साध्याधिकरणहेत्वधिकरणव्यक्त्यनुयोगिकविशेष्यीभूतसम्बन्धप्रतियोग्यनुयोगिकत्वनिरुक्तप्रतियोगिकत्वोभयसत्त्वात् । व्यभिचारनिरूपकाधिकरणहेत्वधिकरणानुयोगिकविशेष्यीभूतसम्बन्धाप्रसिद्धेः साध्याभावस्य लक्षणाघटकत्वेनाभावान्तरस्यैव लक्षणघटकत्वात् । न च परम्परासम्बन्धघटकविशेष्यांशे हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वपरम्पराघटकविशेषणीभूतसम्बन्धवन्निरूपितत्वनिरुक्तप्रतियोगिप्रतियोगिकसम्बन्धवन्निरूपितत्वानां त्र-

याणामभावनिवेशान्न दोषः गगनादिनिरूपितकालिकसम्ब-न्धाप्रसिद्धावपि तन्निरूपिततादात्म्यविषयितादिसम्बन्धवन्निरू-पितत्वप्रसिद्ध्या त्रित्वावच्छिन्नाभावसौलभ्यादिति वाच्य-म् । स्वरूपकालिकोभयसम्बन्धघटितसामानाधिकरण्यसम्ब-न्धेन जन्यज्ञानादेः साध्यत्वे व्यभिचारिणि कालवृत्तित्वादावति-व्याप्त्यापत्तेः । व्यभिचारनिरूपकाधिकरणप्रलयत्वादिनिष्ठायामुक्तस-म्बन्धघटकाधेयतायां कालिकसम्बन्धवन्निरूपितत्वसाध्यीयवि-षयतासम्बन्धवन्निरूपितत्वयोः सत्त्वेनाधेयतासामान्ये दर्शितत्रि-त्वावच्छिन्नाभावासत्त्वेन साध्याभावस्य प्रतियोगिवैयधिकरण्या-निर्वाहात् । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे च नेयमनुपप-त्तिः । हेत्वधिकरणस्फटिकादिनिष्ठस्य समवायादिना प्रतियोगि-व्यधिकरणस्याभावस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगितायां स्वसमवायिसंयोगादिरूपपरम्पराया अवच्छेदकत्वाभावेनोभयाभावा-क्षतेः । न च स्वसमवायिसमवायसम्बन्धेन घटरूपादिसाध्यके स-मवायादिना घटादिहेतावव्याप्तिः, तत्र किञ्चित्समवायिनिरूपित-त्वविशिष्टस्वसमवायादिसम्बन्धावच्छिन्नायां हेतुमत्कपालादिनिष्ठसा-ध्याभावप्रतियोगितायां समवायिसमवायरूपसाध्यतावच्छेदकस-म्बन्धावच्छिन्नत्वसत्त्वात् । न हि तत्र दर्शितप्रतियोगितावच्छेदक-सम्बन्धसाध्यतावच्छेदकसम्बन्धयोः शरीरवैलक्षण्यं किमपि श-क्यते वक्तुम्, स्वांशस्य सम्बन्धाप्रवेशादितरांशस्याविशे-षात् । इयाँस्तु विशेषः, दर्शितसाध्यतावच्छेदकसम्बन्धस्य स-म्बन्धतया भाने प्रथमसमवायविषयता प्रकारतानिरूपिता द्विती-यसमवायविषयता विशेष्यतानिरूपिता, उक्तप्रतियोगितावच्छेदक-सम्बन्धस्य सम्बन्धतया भाने द्वितीयसमवायविषयतैव प्रकारता-विशेष्यतोभयनिरूपितेति, स चानुपयुक्त एवेति वाच्यम् । परम्परासम्ब-न्धावच्छिन्नाभावस्य हि प्रतियोगितावच्छेदकसम्बन्धता परम्पराघट-कयावद्वस्तुषु विशेष्यविशेषणभावापन्नेषु पर्याप्ता, विशिष्टसाक्षात्स-म्बन्धावच्छिन्नाभावस्य तु तादृशसम्बन्धता विशेष्य एव पर्याप्ता, विशेषणं तु सम्बन्धविधयाऽवच्छेदकतायामवच्छेदकमेव, न तु त-दन्तर्भावेण सम्बन्धविधया प्रतियोगितावच्छेदकत्वस्य पर्याप्तिः, ईदृशरीत्यैवाभाववैलक्षण्यनिर्वाहात् । तथा च परम्परासम्बन्धेन

यत्र साध्यता तत्र परम्परापर्याप्तावच्छेदकताकत्वरूपं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेशनीयम्, उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रतियोगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगितायां तदन्तर्भावेण पर्याप्तावच्छेदकताकत्वाभावादिति दिक्।

अथैतल्लक्षणे विषयितादिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः, तादृशसम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नत्वस्याऽप्रसिद्धत्वात्। न च तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेऽपि प्रतियोगितावच्छेदकतायामेव तत्सम्बन्धावच्छिन्नत्वप्रसिद्धिः प्रतियोगित्वतवच्छेदकत्वनिष्ठावच्छेद्यत्वयोर्भिन्नत्वेऽपि एकजातीयतया तादृशानुगतरूपेण निवेशादिति वाच्यम्। तथा सति तादृशसम्बन्धेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीयान्यसम्बन्धावच्छिन्नप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वाभावेन तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य चाऽप्रसिद्धत्वेन तादृशप्रतियोगितासामान्ये तदुभयाभावस्याऽक्षतत्वात्। मैवम्। वृत्त्यनियामकसम्बन्धेन व्यापकतास्वीकारे तादृशसम्बन्धस्याऽभावप्रतियोगितानवच्छेदकत्वे प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणकाभावप्रतियोगितावच्छेदकतासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वतादृशरूपावच्छिन्नत्वोभयाभावस्यैव विवक्षणीयतया सामञ्जस्यात्। तथा हि विषयितासम्बन्धेन साध्यतायां सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदकताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटककसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसम्बन्धेन साध्यादिमदभावः तत्सम्बन्धेनान्यावच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वाल्लक्षणसमन्वयः। तत्सम्बन्धावच्छिन्नसाध्यके व्यभिचारिण्यपि तादृशसम्बन्धेन साध्यवदभावोऽपि तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयसत्त्वेन नातिव्याप्तिः। वह्निमान् धूमादित्यादौ संयोगादिना घटादिमदभावः समवायादिना वह्न्यादिमदभावश्च लक्षणघटकः। तत्प्रतियोगितावच्छेदकतायामुभयाभावस-

त्वाल्लक्षणसमन्वयः । धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकसम्बन्धेन साध्यवतोऽभाव एव तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयस्यैव सत्त्वान्नातिव्याप्तिरिति ।

(दी०) अत एव समवायस्यैकत्वेन द्रव्यत्वप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ, वह्निधूमोभयवान्वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नाऽतिव्याप्तिरित्यपि वदन्ति ॥

(गा०) संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि वह्निधूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिरिति योजना । अयं भावः । प्रत्येकं संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वाविरहेण वह्निधूमोभयवान् धूमादित्यत्र संयोगसम्बन्धसामान्ये वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणानुयोगिकत्वोभयाभाववत्त्वात्तादृशोभयत्वावच्छिन्नाभावोऽपि संयोगेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणतया लक्षणघटक इत्यव्याप्तिः स्यादतः संयोगेनोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्वं परित्यज्य प्रतियोगिताश्रयप्रतियोगिकत्वमेव निवेशनीयं तथा च वह्निधूमोभयवान्वह्नेरित्यादावपि वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणाघटकतया पूर्वकल्पेऽतिव्याप्तिः स्यादिति ।

अथ साध्यतावच्छेदकभेदेन चेद्व्याप्तिपदार्थभेदस्तदैव प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यागः स्थलविशेषे सम्भवति तथा च साधनभेदेनापि तुल्ययुक्त्या तद्भेदाद् धूमरूपहेतुकवह्निधूमोभयात्मकसाध्यघटितव्याप्तिपदार्थप्रसिद्धिनिर्वाहाय तच्छरीरे प्रतियोगिताश्रयवैयधिकरण्यनिवेशनस्य वह्निहेतुके तदुभयसाध्यकस्थले कथमतिव्याप्तिप्रसञ्जकत्वमिति चेत् ? यथा संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिकत्वाभावनिश्चयदशायामपि धूमेन वह्निधूमोभयानुमितिर्भवतीति प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानं धूमलिङ्गकतादृशोभयानुमितिजनकमङ्गीक्रियते, तथा तादृशनिश्चयदशायां सकलवह्निमतामेव धूमवत्त्वमिति भ्रान्तानां वह्निहेतुकतदुभयानुमितिरप्यनुभवसिद्धा । तत्राऽपि प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानमेवाऽनुमितिजनकं वा-

च्यम्, तथा च तद्धेतुकतत्साध्यकानुमितिजनकज्ञानस्य प्रमात्वप्रसङ्ग इत्येवातिव्याप्त्यर्थः । एवं यथा वह्निधूमोभयत्वेन उभयं धूमव्यापकमिति वाक्याद्यथोक्तनिश्चयदशायां शाब्दबोधो जायते तथा वह्निधूमोभयत्वेनोभयं वह्निव्यापकमित्यनाप्तोक्तवाक्यादपि योग्यताभ्रमाच्छाब्दबोधः सर्वानुभवसिद्ध इति प्रतियोगिताश्रयप्रतियोगिकत्वमेव तत्र शाब्दधीविषयः स्वीकरणीयः । तथा च तद्विषयधियः प्रमात्वेन तादृशवाक्यस्य प्रमाणतापत्तिरित्यपीति । वह्निरित्यत्र धूमादिति नातिव्याप्तिरित्यनन्तरमव्याप्तिश्चेति पाठं केचित्कल्पयन्ति, यथासङ्ख्येन च स्थलद्वयेऽतिव्याप्त्यव्याप्ती योजयन्ति ।

इदमत्रावधेयम् । घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षितघटादिवैशिष्ट्यं तद्विशिष्टवैशिष्ट्यं वा भासते । आद्ये एकघटादिमत्यपि तत्प्रसङ्गः । न च द्वित्वोपलक्षितस्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यद्वयं तत्र भासते इति नातिप्रसङ्ग इति वाच्यम् । एकस्मिन्नपि भेदभ्रमेण द्वित्वभ्रमात्तत्प्रकारकप्रतीतावुभयभानानियमात् । तादृशबुद्धेर्द्वित्वविशिष्टाभावज्ञानविरोधितानुपपत्तिश्च विशिष्टवैशिष्ट्यज्ञानस्यैव विशिष्टाभावबुद्धिविरोधित्वात् । द्वितीये संयोगसंसर्गकतादृशज्ञानमात्रस्यैव भ्रमत्वापत्तिः, संयोगरूपवैशिष्ट्ये द्वित्वादिविशिष्टप्रतियोगिकत्वस्य बाधात् । तस्माद्द्वित्वादिविशिष्टप्रतीतौ संयोगमात्रं न सम्बन्धोऽपि तु द्वित्वावच्छिन्ननिरूपिता संयोगावच्छिन्नाधिकरणतैव । अधिकरणता च पदार्थान्तरं अधिकरणस्वरूपा वा उभयथैव निरूपकभेदेऽपि निरूपकतावच्छेदकद्वित्वस्यैक्यात्तदैक्यमिति संयोगप्रतियोगितावच्छेदकत्ववन्न तत्प्रतियोगितावच्छेदकताया द्वित्वे ऽनुपपत्तिरित्युपेयम् । एवं च वह्निधूमोभयत्वावच्छिन्नसाध्यके संयोगावच्छिन्नाधिकरणताया एव साध्यतावच्छेदकसम्बन्धत्वात्तत्र चोभयत्वावच्छिन्नप्रतियोगिताकत्वसत्त्वान्नातिव्याप्तिप्रसक्तिः । अन्यथा द्वितीयकल्पेऽपि प्रतियोगितावच्छेदकावच्छिन्ननिरूपितप्रतियोगितावच्छेदकसम्बन्धानुयोगित्वनिवेशादुभयत्वावच्छिन्नप्रतियोगिकसंयोगाप्रसिद्ध्या संयोगेनोभयत्वावच्छिन्नसाध्यके व्यभिचारिणि तत्सम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताया लक्षणाघटकत्वेनाऽतिव्याप्तेर्वज्रलेपत्वात् ।

वस्तुतस्तु पर्वतो वह्निमानित्यादावपि संयोगावच्छिन्नाधिकरणतैव सम्बन्धो न तु संयोगमात्रम् । अन्यथा पर्वतो वह्निमानित्यत्रेव पर्वते वह्निरित्यत्रापि संयोगमात्रस्यैव तथात्वापत्त्या अविशेषप्रसङ्गात् । तादृशप्रतीत्योर्विशेषाय प्रथमायां संयोगो द्वितीयायां तदवच्छिन्नाधेयता संसर्ग इत्युपेयते, किंवा प्रथमायां संयोगावच्छिन्नाधिकरणता द्वितीयायां संयोगस्तथेत्यत्र विनिगमकस्य दुर्लभत्वात् । न च तादृशप्रतीत्योः संसर्गांशेऽविलक्षणत्वेऽपि विशेष्यविशेषणभावभेदाद्वैलक्षण्योपपत्तिसम्भव इत्युभयत्रैव संयोगमात्रस्य सम्बन्धतास्त्विवति वाच्यम् । तावतापि पर्वतो वह्निमान् वह्नौ पर्वत इत्यनयोः, पर्वते वह्निः पर्वतवान्वह्निरित्यनयोश्च प्रतीत्योर्विशेषानिर्वाहात् । न चैवं रूपवानित्यादावपि समवायावच्छिन्नाधारतैव सम्बन्धः स्यान्न तु समवाय उक्तयुक्तेरविशेषादिति वाच्यम् । समवायातिरिक्तायाः समवायावच्छिन्नाधारताया अनभ्युपगमात् ।

अथ समवायावच्छिन्नाधारतायाः समवायरूपत्वे समवायावच्छिन्नाधेयताऽवश्यमतिरिक्ता स्वीकरणीया, अन्यथा रूपवान्घटो घटे रूपमिति प्रतीत्योः संसर्गवैलक्षण्यानुपपत्तेः । तथा च समवायावच्छिन्नाधेयता आधारता वाऽतिरिक्तेत्यत्र विनिगमकं दुर्लभमिति समवायातिरिक्तसमवायावच्छिन्नाधारतासिद्धिर्निष्प्रत्यूहैवेति चेन्न । घटानुयोगिकरूपप्रतियोगिकसम्बन्धो रूपानुयोगिकघटप्रतियोगिकसम्बन्धः परस्परं विलक्षण एव, अन्यथा दर्शितस्थले संसर्गवैलक्षण्यानिर्वाहादिति सत्यम्, तत्र चाधारानुयोगिकः सम्बन्ध एव समवाय इति परिभाषितो न त्वाधेयानुयोगिकः, स त्वाधेयतत्येव परिभाष्यते तत्र को विनिगमकानुयोगः ? न चैवं संयोगिन्यपि संयोग एवाधारताऽस्तु स चाऽनुयोगितासम्बन्धेनाऽऽधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विष्ठत्वेऽपि नाधेये तद्व्यवहार इति वाच्यम् । संयोगीयसमवायातिरिक्ताया आधेयव्यावृत्तानुयोगितायाः स्वीकारे तस्या एव संयोगिनिरूपिताधारतात्वोपगमेनाऽतिरिक्ताधारताया निष्प्रत्यूहत्वात् । न चाधारतायां संयोगिप्रतियोगिकत्वं कल्पनीयमिति गौरवम् । भवन्मतेऽपि संयोगे तत्समवेतत्वातिरिक्तस्य तत्प्रतियोगिकत्वस्य कल्पनीयतया

साम्यात् । अन्यथा भूतलादेः स्वसमवेतघटादिसंयोगानुयोगितया स्वाधारतापत्तेः । एतेन संयोगिन्याधेयताऽपि संयोग एव । प्रतियोगितासम्बन्धेन तस्याधेयपदप्रवृत्तिनिमित्ततया नाधारे तद्व्यवहार इत्यपि निरस्तम् । आधेयनिष्ठाधारव्यावृत्तपदार्थान्तरकल्पनाया आवश्यकत्वात् । आधाराधेययोः संयोगानुयोगित्वप्रतियोगित्वकल्पने विपरीतकल्पनायामपि बाधकाभावाच्चेति दिक् ।

एकानुयोगिकसंयोगद्वयप्रतियोगितयोः प्रत्येकमुभयत्वावच्छिन्नत्वविरहेऽपि तदुभयत्वावच्छेदेनोभयत्वावच्छिन्नत्वोपगमान्न संयोगेनोभयसाध्यके ऽतिव्याप्तिरित्यप्याहुः । प्रतियोगित्वावच्छेदकत्वादेः स्वरूपसम्बन्धरूपतया सम्बन्धत्वेन तन्निवेशे सम्बन्धत्वस्य नियमघटिततयाऽनवस्थेत्याशङ्कां निरस्यति ।

(दी०) प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन निविष्टः । सामानाधिकरण्येऽपि सम्बन्धः संयोगत्वादिनैव निविशते । दर्शितश्च नियमाघटितमपि सम्बन्धत्वम् ।

(गा०) प्रतियोगित्वादिश्चेति । सम्बन्धविशेषोऽपि न सम्बन्धत्वेन लक्षणघटकोऽपि तु प्रतियोगितात्वादिना, कुत्रचित्सम्बन्धविधया स्वरूपत एवेत्यर्थः ।

ननु सामानाधिकरण्यं तत्सम्बन्धिसम्बन्धित्वं तत्र सम्बन्धत्वेनैव सम्बन्धनिवेश इत्याशङ्क्याह । सामानाधिकरण्येऽपीति । संयोगत्वादिनैवेति । साधनतावच्छेदकादिभेदेनेव सम्बन्धादिभेदेनाऽपि व्याप्तिभेदस्येष्टत्वादिति भावः । साध्यसामानाधिकरण्यशरीरे साध्यवत्संयुक्तत्वादिरूपे हेतोः सम्बन्धस्य प्रकारतया तस्यैव संयोगत्वादिना निवेशः, साध्यसम्बन्धस्य च धर्म्यंशे तत्संसर्गविधयैव लाघवेन निवेशात्तस्य स्वरूपत एव निवेशः सम्भवति, जात्यतिरिक्तस्याऽपि संसर्गतया भाने स्वरूपतोऽपि तदुपगमादित्यवधेयम् । सम्बन्धत्वनिवेशेऽपि न क्षतिरित्याह । दर्शितं चेति । नियमाघटितमिति । तत्प्रतियोगिकत्वविशेष एव तत्सम्बन्धत्वं न तु तद्विशिष्टबुद्धिनियामकत्वम्, अतीन्द्रियसम्बन्धे जनकत्वरूपनियामकत्वासम्भवात् । तत्प्रतीतिविषयत्वरूपनियामकत्वनिवेशे व्याप्तेरेवानन्तर्भावात् प्रमेयमात्रेऽतिप्रसङ्गाच्च । न च विशेष्यतान्यतत्प्रकार-

तानिरूपितविषयताया विवक्षणीयतया नाऽतिप्रसङ्ग इति वाच्यम् । एवमपि संयोगादिना द्रव्यत्वादिभ्रमविषयतामादाय तस्यापि तत्सम्बन्धत्वापातात् । न च विषयतायां प्रमाप्रतियोगिकत्वनिवेशान्नायमतिप्रसङ्ग इति वाच्यम् । प्रमात्वस्य तत्सम्बन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतया सम्बन्धत्वघटितत्वात् । एवं तदनुयोगिकत्वविशेष एव तत्र सम्बन्धत्वमिति भावः । इत्थं च सामान्यतस्सम्बन्धघटितं साध्यवत्सम्बद्धत्वरूपसाध्यसामानाधिकरण्यं साध्यवदनुयोगिकप्रतियोगित्वं प्रतियोगितासम्बन्धेन साध्यवदनुयोगिकवत्त्वं वा, तच्च संयोगत्वादिना तद्घटितात्साध्यवदनुयोगिकसंयोगप्रतियोगिकत्वरूपाल्लघुशरीरमिति तदेव व्याप्तिघटकं वाच्यम्, अतिप्रसङ्गस्य व्यापकतायां विशिष्य सम्बन्धनिवेशेनैव वारणसम्भवात् । हेतौ साध्यवदसंयुक्तत्वादिनिश्चयदशायां संयोगादिना पक्षे हेतुमत्तानिश्चयस्य साक्षादनुमितिप्रतिबन्धकताया अग्रे वक्तव्यतया तत्राऽनुमित्यापत्त्यनवकाशादिति सूचितम् ।

अभावत्वं चेदत्र भावभिन्नत्वन्तदा प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वोभयाभावनिवेशपक्षे दैशिकविशेषणतया घटत्वाभावादिसाध्यके व्यभिचारिण्यतिप्रसङ्गः, तादृशसम्बन्धावच्छिन्नतदभावस्य घटत्वादिरूपतया भावभिन्ननिरूपितप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वघटत्वाभावत्वावच्छिन्नत्वोभयाभावस्याऽक्षतत्वादित्याशङ्कां निरस्यति ।

(दी०) अभावत्वं चेदमिह नास्ति, इदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः । अतो नाऽभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः । तदपि वा नोपादेयं प्रयोजनविरहात् । विषयतात्वादिवत् प्रतियोगित्वाधिकरणत्वतत्तत्सम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः ॥

(गा०) अभावत्वं चेति । इदमिह नाऽस्तीदमिदं न भवतीति द्विविधप्रतीतिकथनेनाऽभावत्वस्य संसर्गाभावान्योन्याभावोभयसाधारण्ये प्रमाणमुपदर्शितम्, तस्यान्योन्याभावसाधारण्यविरहेऽभावान्तरप्रतियोगितासामान्ये तादात्म्यसम्बन्धावच्छिन्नत्वविरहेण तेन स-

म्बन्धेन साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । भावाभावसाधारणं इति । भावेनाऽपि घटे घटत्वाभावो नास्ति घटो न घटभिन्न इति प्रतीतेर्जननादिति भावः । तदवच्छिन्ने चाभावपदस्य रूढिशक्तिः परिभाषैव वा, अतो न भावोऽभाव इत्यवयवव्युत्पत्त्या तद्धर्माप्रत्ययेऽपि न क्षतिः । स्वरूपसम्बन्धविशेष इति । अभावे तत्प्रतियोगिस्वरूपनिरूपितानुयोगित्वनामा सम्बन्धविशेष इत्यर्थः । न चा ऽभावत्वस्य स्वरूपसम्बन्धरूपत्वेऽननुगमादनुगतप्रत्ययानुपपत्तिः, तदनुगमकरूपान्तराभ्युपगमात् । पदार्थान्तरत्वेऽपि निरूपकभेदेन सम्बन्धान्तरवत्तद्भेदस्याऽऽवश्यकतयाऽनुगमकरूपान्तरापेक्षणात् ।

यत्तु प्रतियोगिनिरूपितसम्बन्धानामननुगमेऽपि प्रतियोगिधर्मितावच्छेदकस्य नञ्पदप्रवृत्तिनिमित्ताखण्डधर्मान्तरस्य सत्त्वाद्घटो नाऽस्ति पटो नास्तीत्याद्यनुगतप्रमितिनिर्वाह इति । तन्न साधीयः । घटादौ घटाभावादेः कालिकादिसम्बन्धस्याऽपि स्वरूपतया तत्संसर्गकप्रतीतितो घटाभावो नास्तीत्याद्यनुयोगितासंसर्गकप्रतीतेर्वैलक्षण्याय संसर्गतावैलक्षण्यस्याऽऽवश्यकतया संसर्गतावच्छेदकधर्मविशेषस्वीकारस्य तन्निर्वाहकस्याऽऽवश्यकत्वात्, तेनानुगतीकृतानुयोगिताया एव संसर्गतावद्धर्मितावच्छेदकताया अपि सम्भवेनाऽभावनिष्ठाखण्डधर्मान्तरे मानाभावात् । नञ्पदप्रवृत्तिनिमित्तताया अपि तस्यामेवोपगमात् ।

अथ नास्तीत्यादावनुयोगितारूपसम्बन्धविशेषप्रकारेणाऽभावभानोपगमे तदंशे एव स्वनिरूपितत्वसम्बन्धेन प्रतियोगिनः प्रकारत्वसम्भवादभावांशे तत्सम्बन्धेन प्रतियोगिनो भाने मानाभावादनुयोगितायाः सम्बन्धत्वमेव न सिध्येदिति चेन्न । मण्याद्यभावस्य दाहादिहेतुतायां मण्यादिरूपप्रतियोग्यवच्छिन्नानुयोगिताविशेषस्याऽवच्छेदकत्वापेक्षयाऽनुयोगितासम्बन्धेन मण्यादेस्तथात्वे लाघवेन तत्सम्बन्धतासिद्धेः । न चोभयाभावादिवारणाय मणित्वाद्यवच्छिन्ननिरूपितानुयोगिता मण्यादेः सम्बन्धो वाच्यः, तथा च तादृशानुयोगितायाः स्वाश्रयतासम्बन्धेनावच्छेदकत्वेऽपि न गौरवमिति वाच्यम् । उभयत्वाद्यवच्छिन्ननिरूपितानुयोगिताया मणित्वादिविशिष्टसम्बन्धताविरहात्, शुद्धानुयोगितासम्बन्धेनैव मणित्वादिविशिष्टस्य उभयत्वाद्यवच्छिन्नाभावव्यावर्तकतासम्भवेन तादृशानु-

योगितात्वेन सम्बन्धतानुपगमात् । न च तादृशस्य विशिष्टमणित्वाद्यवच्छिन्नाभावव्यावर्तकता न सम्भवति, विशिष्टमणित्वाद्यवच्छिन्ननिरूपितानुयोगितायामप्यधिकं त्वित्यादिन्यायेन मणित्वादिविशिष्टनिरूपितत्वसत्त्वेन तस्या अपि तत्सम्बन्धत्वादिति वाच्यम् । कारणतावच्छेदकतापर्याप्त्यधिकरणपरिसमाप्तप्रतियोगिताकसम्बन्धिन एव कारणतया मणिर्नास्तीत्याकारकशुद्धमणित्वावच्छिन्नप्रकारकप्रतीत्यविषयविशेषणान्तरसहितमणित्वाद्यवच्छिन्नाभावनिष्ठतादृशमणित्वाद्यवच्छिन्ननिरूपितत्वसम्बन्धे च शुद्धमणित्वादिविशिष्टपरिसमाप्तप्रतियोगिताकत्वविरहेण तादृशाभावव्यावर्तनसम्भवात् ।

एतेन विशिष्टमणित्वाद्यवच्छिन्नाभाववारणाय शुद्धमणित्वाद्यवच्छिन्नप्रतियोगिताकत्वेन हेतुता वाच्या, शुद्धमणित्वाद्यवच्छिन्नत्वं च मणित्वान्यधर्मानवच्छिन्नत्वम्, तदपि यदि तादृशधर्मावच्छेद्यत्वत्वाद्यवच्छिन्नाभावस्तदा किञ्चिद्विशिष्टतादृशावच्छेद्यत्वत्वावच्छिन्नाभावमादायातिप्रसङ्ग इति शुद्धतादृशावच्छेद्यत्वत्वावच्छिन्नाभाव एव निवेशनीयः । शुद्धतादृशावच्छेद्यत्वत्वाद्यवच्छेद्यत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशेषणानवस्थाप्रसङ्ग इत्यपि निरस्तम् । इत्यलमप्रस्तुताधिकजल्पनया ।

तदपि । तादृशाभावत्वमपि । नोपादेयम् । हेतुसामानाधिकरण्यांशे विशेषणतया न निवेशनीयम् । प्रयोजनाभावादिति । स्वावच्छेदकविशिष्टानधिकरणहेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावं निवेश्य तदीयत्वेन प्रतियोगितानिवेशादेव सर्वसामञ्जस्यादिति भावः ।

प्रसङ्गात्प्रतियोगित्वादीनामपि पदार्थान्तरत्वं व्यवस्थापयति । विषयतेति । तत्त्वम् विषयतात्वम् । प्राचीनैकदेशिभिर्विषयताया अतिरिक्तपदार्थत्वोपगमाद् दृष्टान्तत्वेन तदुपन्यासः । यथा विषयताया विषयरूपत्वे द्रव्यत्वावच्छिन्नघटविषयकज्ञानाद्घटत्वावच्छिन्नतद्विषयकज्ञानस्य विषयतावैलक्षण्यविरहादवैलक्षण्यापत्तिः । न च द्रव्यत्वघटत्वयोरपि तत्र विषयतया तद्वैलक्षण्यादेव वैलक्षण्यमिति वाच्यम् । तावताऽपि द्रव्यत्वेन घटविषयकाद्घटत्वेन च पटविषयकाज्ज्ञानाद्घटत्वेन घटं द्रव्यत्वेन पटमवगाहमानस्य ज्ञानस्य वैलक्षण्याद्युपपादनस्याशक्यत्वात् । ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनीयघटपटादिविषयतानामभिन्नतापत्त्या तादृशज्ञानस्य पट-

त्वाद्यवच्छिन्नघटादिनिष्ठविषयताशालितया भ्रमत्वापत्तिः। ज्ञानविषयोभयरूपत्वे च जातिमान् घट इत्यादिज्ञानीयघटत्वादिविषयताया द्वैविध्यानुपपत्तिः ज्ञानविषययोरविशेषादिति जातिमानित्याद्याकारकैकविधघटत्वादिविषयताशालिज्ञानात्तादृशबुद्धेर्विलक्षणाकारता न स्यादित्यादियुक्त्या विषयतायाः विषयादिभेदभिन्नविषयतानामनुगमकतया च विषयतात्वस्यातिरिक्ततासिद्धिः, तथा प्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटादिनिष्ठानां घटत्वद्रव्यत्वादिरूपविभिन्नधर्मावच्छिन्नानां संयोगसमवायादिरूपविभिन्नसम्बन्धावच्छिन्नप्रतियोगितानामवैलक्षण्येनाऽभाववैलक्षण्यानुपपत्तिः। अभावस्वरूपत्वे घटाद्यभावीयघटत्वाद्यवच्छिन्नप्रतियोगित्वकिञ्चिद्विशिष्टघटाभावाभावत्वाद्यवच्छिन्नप्रतियोगितानामवैलक्षण्यापत्तेः। घटत्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः, घटाद्यभावस्य पटादिसाधारण्येन पटादेरपि तत्प्रतियोगितापत्तेश्चेत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिद्ध्यति। एवमधिकरणत्वं नाधिकरणस्वरूपमाधेयस्वरूपं वा, भूतले घटसंयोगदशायामिव परस्परासंयुक्तघटभूतलसत्त्वदशायामपीदानीं भूतलं घटवदिति प्रत्ययप्रसङ्गात्। संयोगरूपत्वे आधेयत्वस्यापि तुल्ययुक्त्या तद्रूपतया आधारत्वाधेयत्वयोरभेदप्रसङ्गेन वैपरीत्येनाधाराधेयभावप्रत्ययप्रसङ्गादिति तदप्यतिरिक्तः पदार्थः। सम्बन्धत्वमपि क्लृप्तपदार्थान्तर्भावेण दुर्वचमिति पदार्थान्तरमेवेति भावः। आदिपदादभावत्वादिपरिग्रहः।

इदं तु बोध्यम्। अभावत्वं प्रतियोगित्वान्नातिरिच्यते तदभावत्वस्य तत्प्रतियोगित्वनियमात्। न चैवं घटादेर्घटभेदाभावत्वापत्त्या घटादिमति भूतले घटभेदो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यम्। संसर्गावच्छिन्नप्रतियोगिताया एवाभावत्वरूपतोपगमात्। घटादिभेदस्य घटत्वाद्यत्यन्ताभावसमनियतत्वेन तदभिन्नतया घटत्वादौ तदीयसंसर्गावच्छिन्नप्रतियोगितासत्त्वात्तेनैव तदभावप्रत्यायनात्। न चैवमपि घटभेदादेर्घटाद्यभावत्वानुपपत्तिस्तदप्रतियोगित्वादिति वाच्यम्। अत्यन्ताभावत्वात्मकानुयोगिताविशेषस्यैव प्रतियोगितानतिरिक्तत्वोपगमादिति।

इति–अनुमानगादाधर्यां सिद्धान्तलक्षणम्॥

अवच्छेदकत्वनिरुक्तिप्रकरणम् ।

प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितुमवच्छेदकपदस्य स्वरूपसम्बन्धरूपावच्छेदकत्वपरतामाक्षिपति । नन्वित्यादिना ।

(दी०) नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः । सम्भवति लघौ धर्मे गुरौ तदभावात्, प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेरतथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । नाऽप्यनतिरिक्तवृत्तित्वम् । प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् ।

(गा०) इह । एतल्लक्षणे, घटकत्वं सप्तम्यर्थः । तथा च घटत्वेन घटोऽभावप्रतियोगीत्यादिप्रतीतिसाक्षिको यो घटादिनिष्ठप्रतियोगितया सह घटत्वादेरवच्छेदकभावरूपः स्वरूपानतिरिक्तः पदार्थान्तरात्मको वा सम्बन्धविशेषः स इह लक्षणे न शक्यनिवेशन इत्यर्थः । स्वरूपसम्बन्धविशेषात्मकावच्छेदकत्वाभावघटितं निरुक्तरूपं न व्याप्तिरूपमिति यावत् । तेन रूपेण साध्यतायां व्यभिचारिण्यतिव्याप्तेरित्यग्रिममत्रैव हेतुः । प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकव्यभिचारिसाधारणत्वादिति तदर्थः । प्रमेयधूमत्वेत्यादिकमतथात्वेनेत्यन्तं तत्र हेतुः । स्वसमानाधिकरणाभावप्रतियोगितानिरूपिततादृशावच्छेदकत्वाभाववत्तादृशसाध्यतावच्छेदककत्वेनेति तदर्थः । संभवत्तादृशप्रतियोगितावच्छेदकताकधर्मापेक्षया गुरुत्वं प्रमेयधूमत्वादेस्तादृशप्रतियोगितावच्छेदकत्वाभावसाधकम् ।

तस्य तत्साधकत्वोपष्टम्भकव्याप्तिमाह–सम्भवतीति । तस्मिन्निति पूरणीयम् । तथा च लघुधर्मे तादृशावच्छेदकत्वस्य सम्भवे इत्यर्थः । गुरौ तदभावात्–तादृशावच्छेदकत्वाभावनियमात् । तथा च सम्भवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स न तदवच्छेदक

इति व्याप्तिरिति पर्यवसितार्थः। सम्भवत्तदवच्छेदकताकत्वं च तद-वच्छेदकत्वबाधकशून्यत्वम्। बाधकं चावच्छेद्यप्रतियोगित्वासम-नियतत्वम्। तथा च तत्प्रतियोगित्वादिसामनैयत्यमेव सम्भवत्त-दवच्छेदकताकत्वं पर्यवसितम्। सामनैयत्यघटकदलद्वयनिवेशाद्घट-पटान्यतरत्वमहानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताया न्यून-वृत्तिघटत्वादेरतिरिक्तवृत्तिशुद्धवह्नित्वादेरवच्छेदकत्वासम्भवेन ता-दृशगुरुधर्मस्य नाऽवच्छेदकत्वानुपपत्तिः। प्रतियोगितायाः सामनैय-त्यं च प्रतियोगिताया अन्यूनवृत्तित्वे सति तन्निरूपकाभावविरोधि-तावच्छेदकत्वरूपमवच्छेदकतानिर्वाहकम। अतः सत्तात्वादेर्विशि-ष्टसत्ताद्यभावीयप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वेऽपि तदभाव-विरोधितानवच्छेदकत्वान्न तत्प्रतियोगितावच्छेदकत्वसम्भवः।

यत्तु स्वावच्छिन्नसमव्यापकतावच्छेदकधर्मापेक्षया गुरुत्वमेवा-ऽच्छेदकत्वाभावसाधकतयाऽभिमतम। स्वसमनियतसत्तात्वाद्यपे-क्षया गुरोर्विशिष्टसत्तात्वादेः प्रतियोगितावच्छेदकत्वनिर्वाहाय स्व-समनियतत्वमुपेक्ष्य स्वावच्छिन्नसमव्यापकतावच्छेदकत्वनिवेश इति तन्न। घटप्रागभावत्वावच्छिन्नसमव्यापकतावच्छेदकघटत्वाद्य-पेक्षया गुरोर्घटप्रागभावत्वादेरत्यन्ताभावप्रतियोगितावच्छेदकतया, जातित्वावच्छिन्नसमव्यापकतावच्छेदकतद्घटकसमवेतत्वापेक्षया गुरोर्जातित्वादेर्भेदप्रतियोगितावच्छेदकतया च व्यभिचारात्।

ननु प्रमेयधूमत्वं स्वावच्छिन्नधर्मिविशेषणतापन्नमेयत्वसहित-धूमत्वम्, सामानाधिकरण्यसम्बन्धेन मेयत्वविशिष्टधूमत्वं वा, उ-भयथैव तदवच्छिन्नसाध्यके नाऽतिव्याप्तिप्रसक्तिः, शुद्धधूमत्व-स्याऽवच्छेदकत्वे तादृशानवच्छेदकताया विशिष्टधूमत्वे दुर्घटत्वात्। एकदेशपर्याप्तवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावस्य वि-शेष्यपर्याप्तवृत्तेर्विशेषणान्तरवैशिष्ट्यावच्छिन्नानुयोगिताकाभावस्य चाऽनभ्युपगमात्। शुद्धवह्नित्वादौ धूमादिसमानाधिकरणाभावप्रति-योगितावच्छेदकत्वापर्याप्तेर्मेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन मेयवह्निमान्धूमादित्यादावव्याप्तिविरहादित्यरुचेः कम्बुग्रीवादिमत्त्वा-नुधावनम्।

नचैवं मेयधूमत्वावच्छिन्नसाध्यकेऽतिव्याप्त्यभिधानमत्यन्तास-ङ्गतमिति वाच्यम्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभा-

वानुपगमेन नानाव्यक्तिदण्डाद्यवच्छिन्नस्य व्यापकतानिर्वाहाय प्रतियोगितावच्छेदकापर्याप्तविषयतापर्याप्तिरनवच्छेदकत्वान्तार्थ इत्याशयेनैव तदभिधानात् । कम्बुग्रीवादिमत्त्वं च घटत्वव्यञ्जकसंस्थानविशेषः । घटत्वापेक्षया तस्य गौरवं संस्थानस्य विजातीयावयवसंयोगरूपस्यानन्तत्वात्, अनुगमकजातिविशेषसापेक्षत्वाच्च । घटत्वस्य चैकस्य जातिरूपस्य निर्विशेषणकस्यावच्छेदकत्वे लाघवादिति ।

न च घटसामान्याभावप्रतियोगितायां संस्थानविशेषस्यानवच्छेदकत्वेऽपि तत्तत्संस्थानवदभावकूटप्रतियोगितासु प्रत्येकं तेषामवच्छेदकत्वमावश्यकम्, तत्राऽतिप्रसक्तघटत्वस्याऽवच्छेदकत्वासम्भवादित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्त्यवकाश इति वाच्यम् । तत्तत्संस्थानवत्तत्तद्घटाभावप्रतियोगितायामपि घटनिष्ठतत्तद्व्यक्तित्वस्यैव साक्षात्सम्बन्धेनावच्छेदकत्वसम्भवात्परम्परासम्बन्धेन स्वसमवायिसमवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणानवच्छेदकतया तादृशसम्बन्धेन संस्थानविशेषावच्छिन्नघटादिसाध्यके व्यभिचारिहेतावतिव्याप्तेर्दुर्वारत्वात् ।

ननु मृत्पाषाणादिघटसाधारणं घटत्वं नैकम्, मृत्त्वपाषाणत्वादिना सङ्करप्रसङ्गादिति तत्तज्जातिव्याप्यं नानैव, तथा च तथाविधसकलघटानुगमकसंस्थानविशेषावच्छिन्नप्रतियोगितायां न स्वरूपतो घटत्वस्यावच्छेदकतासम्भवः, न्यूनवृत्तित्वात् । नाप्यनुगतरूपान्तरावच्छिन्नस्य, तादृशरूपान्तरप्रवेशेन गौरवादित्यरुचेर्घ्राणग्राह्यगुणत्वानुधावनम् । घ्राणग्राह्यत्वं घ्राणग्रहणयोग्यता गुणत्वन्यूनवृत्तिघ्राणग्राह्यजातिरूपा, सा चातीन्द्रियेऽपि गन्धे इति न गन्धत्वस्य दर्शितरूपवत्सामान्याभावप्रतियोगितासमनैयत्यानुपपत्तिः । तादृशयोग्यतामात्रस्योपादाने गन्धत्वसुरभित्वादिरूपायास्तस्याः स्वरूपतो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया तादृशजातित्वाद्यवच्छिन्नाया अप्यनवच्छेदकत्वं दुर्लभमिति तद्विशेष्यतया गुणत्वनिवेशनम् । द्रव्यत्वादिहेतुकस्थले च गुणत्वस्य शुद्धस्यापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वासम्भवाद्विशिष्टगुणत्वस्य गन्धत्व[illegible]मनियतस्य

तादृशप्रतियोगितानवच्छेदकत्वमक्षतमेवेत्यतिव्याप्तिसङ्गतिः । अथ-वा घ्राणग्राह्यगुणत्वं स्वाश्रयगुणत्वव्याप्यजातिमत्त्वसम्बन्धेन घ्राणजन्यसाक्षात्कारविषयतावत्त्वमेव, गुणत्वव्याप्यजातिघटितस-म्बन्धलाभाय गुणपदम्, न तु गुणत्वमपि विशेष्यतया विवक्षितम् ।

एतेन गुणत्वस्य निरुक्तजातित्वावच्छिन्नगन्धत्वादिविशेष्यतया विवक्षितत्वे स्वरूपतो गन्धत्वादेर्गुणत्वविशेषणतायामप्यतिप्रस-ङ्गात्तादृशजातित्वावच्छिन्नस्य विशेषणत्वानुधावनं निर्बीजमिति दूषणमनवकाशम् । घ्राणग्राह्यगुणत्वं यथाश्रुतमेव ग्राह्यगन्धत्व-रूपलघुधर्मसमनियततया न प्रतियोगितावच्छेदकमित्यपि वदन्ति ।

यत्तु अनवच्छेदकत्वमवच्छेदकाविषयकप्रतीतिविषयत्वरूप-म् । तथा चावच्छेदकताघटकसम्बन्धेन विशेष्यांशेऽवच्छे-दकप्रकारकप्रतीतिभिन्ना साध्यतावच्छेदकताघटकसम्बन्धेन या-दृशधर्मप्रकारिका प्रतीतिस्तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितम् । एवं च प्रमेयधूमत्वादिप्रकारकप्रती-तेर्धूमत्वादिप्रकारकतानियमात् प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकेऽति-व्याप्तिपरिहारः सम्भवति न तु निरुक्तघ्राणग्राह्यगुणत्वाद्यवच्छि-न्नसाध्यके, गन्धत्वादिकमविषयीकृत्यापि सुरभित्वादिकं सुर-भित्वादिकमविषयीकृत्यापि च गन्धत्वादिकं विषयीकृत्य तादृ-शसाध्यतावच्छेदकप्रकारकप्रतीतिसम्भवादिति । तन्न । तथा सत्युक्तरीत्या दण्डिमान् द्रव्यत्वादित्यादावतिव्याप्तेः । प्रत्येकं सकलदण्डमविषयीकृत्यैव दण्डत्वाद्यवच्छिन्नदण्डात्मकसाध्यताव-च्छेदकप्रकारकप्रतीतेः सम्भवात् ।

अथ प्रतियोगितावच्छेदकीभूता ये ये धर्मास्तत्प्रकारकप्रतीति-भेदकूटस्य साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छेद-कप्रकारिकायामेकप्रतीतावसत्त्वात्तथैव च लक्षणे विवक्षितत्वान्नेय-मतिव्याप्तिरिति चेत् ? तर्हि तादृशरीत्या निरुक्तघ्राणग्राह्यगुणत्वाव-च्छिन्नसाध्यकेऽपि नाऽतिव्याप्त्यवकाश इति ।

अतथात्वेन । प्रतियोगितानवच्छेदकत्वेन । अनतिरिक्तवृत्तित्व-मिति । स्वव्यापकतत्कत्वमित्यर्थः । तच्छून्यावृत्तित्वविवक्षणे समवा-येन प्रमेयसाध्यके व्यभिचारिण्यतिप्रसङ्गात् । प्रमेयसामान्याभावप्र-तियोगिताशून्याप्रसिद्ध्या प्रमेयत्वादेस्तादृशावच्छेदकत्वानिर्वाहात् ।

महानसीयवह्नित्वाद्यवच्छिन्नसाध्यके धूमादौ वह्नित्वादेर्महानसीय-वह्न्याद्यभावप्रतियोगिताशून्यवह्न्यन्तरवृत्तितया विशिष्टेऽपि तत्र तच्छून्यावृत्तित्वस्य दुर्घटतयाऽतिप्रसङ्गाच्च । स्वव्यापकतत्कत्वनिवेशने च विशिष्टस्याऽविशिष्टस्य वा यादृशस्यावच्छेदकत्वमभिप्रेतं तादृशस्यैव स्वपदेनोपादेयतया विशिष्टवह्नित्वादिकं प्रति विशिष्टवह्न्याद्यभावप्रतियोगितायाः व्यापकत्वस्याऽक्षतत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः । ईदृशं यद्यत्स्वं तत्त्वाभावकूटस्य च साध्यतावच्छेदकविशेषणता बोध्या, अतः स्वत्वाननुगमेनैकसामान्याभावनिवेशासम्भवात् यत्किञ्चिदेकावच्छेदकनिष्ठावच्छेदकत्वमादायातिप्रसङ्गानवकाशः ।

न च स्वपदस्य तत्तद्व्यक्तिपरतयाऽवच्छेदकनिष्ठं तत्तद्व्यक्तित्वमेव पर्यवसितमवच्छेदकत्वम्, तथा च विशेषणावच्छिन्ननिष्ठतत्तद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादेरवच्छेदकत्वे शुद्धस्यापि अनवच्छेदकतादुर्भिक्षमिति वाच्यम् । शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता अभावप्रतियोगितानिष्ठव्यापकताशरीरे निविष्टा तादृशरूपपर्याप्तावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदकविशेषणत्वोपगमात् । मेयधूमत्वादिपर्याप्ताया अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधाया विषयतावच्छेदकतायाः प्रसिद्ध्याऽतिव्याप्त्यनवकाशात् । महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वादावपर्याप्तत्वाद्विशिष्टवह्न्याद्यभावमादाय दोषानवकाशात् ।

अत्र यदि हेतुसमानाधिकरणाभावप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्यते तदा निखिलवह्न्यादेरेव धूमादिसमानाधिकरणविशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्यापकतावच्छेदकतादृशप्रतियोगितात्वकत्वरूपतादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्तिरिति तादृशयत्किञ्चिदेकप्रतियोगितानतिरिक्तवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकतादृशप्रतियोगिताकत्वरूपं निवेशनीयम् । तथा सति धूमवान् वह्नेरित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वं न स्यात्, धूमादिसामान्याभावप्रतियोगिताया अपि धूमादिस्वरूपतया प्रतिधूमादिकं भिन्नत्वेन प्र-

त्येकं धूमत्वादिसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वादिति तत्तद्धूमत्वादेरेव तथात्वादतिव्याप्तिरित्याह । प्रतियोगिताया इति । स्वरूपसम्बन्धात्मिकाया इति । प्रतिव्यक्तिभेदप्रयोजकहेतुगर्भ-विशेषणम् । अतिरिक्तपदार्थरूपप्रतियोगितायाः सिद्धान्तविरुद्धत्वा-दिति भावः । तादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वनिवे-शेऽपि हेतुसमानाधिकरणाभावत्वेन तादृशाभावनिवेश एव पू-र्वोक्तदोषः, न तु तादृशाभावस्य प्रातिस्विकरूपेण निवेशने, तत्तद्वि-शेषाभावप्रतियोगितात्वस्य वह्नित्वादिव्यापकतानवच्छेदकत्वादि-त्याशयेनाशङ्कते—

(दी०) न च तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामा-न्यशून्यावृत्तित्वं तत् । अत एवातिरिक्तसामान्याभावस्या-भावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि साधु सङ्गच्छते इति वाच्यम् । वह्निघटवृत्तिद्वित्वतार्णतार्णदहनवृत्ति-द्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिव-ह्नित्वादावतिप्रसङ्गात् ।

(गा०) न चेति । तथाविधेति । प्रतियोग्यनधिकरणहेतुमद्वृत्ती-त्यर्थः । यत्किञ्चित्पदं तत्तद्व्यक्तित्वेनाऽभावनिवेशलाभाय । प्रत्येकं निविष्टस्याऽपि तथाविधाभावस्य सकलस्य नैकत्रावच्छेदकता-घटकता किन्तु एकस्यैवेति स्फोरणायैकपदम् । तादृशप्रतियोगि-तासामान्यशून्यावृत्तित्वं स्वव्यापकतावच्छेदकतादृशप्रतियो-गितात्वकत्वम्, अतो न पूर्वोक्तदोषः । अत एव । ईदृशावच्छे-दकत्वस्य मूलाभिप्रेतत्वादेव । अतिरिक्तेति । सामान्याभाव-स्य विशेषाभावकूटातिरिक्तत्वानभ्युपगमे इत्यर्थः । धूमत्वादे-रपीति । विशेषाभावकूटान्तर्गतमेकमभावमुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपपादनासम्भवादिति भावः । तत्साधनमि-ति । सामान्याभावस्याऽतिरिक्तत्वव्यवस्थापनमित्यर्थः । सङ्गच्छते इति । अन्यथा स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे विशेषाभावकूटा-तिरिक्तसामान्याभावानभ्युपगन्तृमतेऽपि विशेषाभावीयप्रतियोगि-ताकूटस्यैव सामान्यधर्मावच्छिन्नतया धूमत्वादावपि वह्न्यादिस-

मानाधिकरणधूमादिविशेषाभावप्रतियोगितावच्छेदकत्वेनाऽतिव्याप्त्यप्रसक्त्या सामान्याभावपार्थक्यव्यवस्थापनस्य एतल्लक्षणप्रस्तावेऽनुपयुक्तत्वापत्तेरिति भावः ।

न चातिरिक्तसामान्याभावाभावे उक्तरीत्याऽतिव्याप्तिविरहेऽपि ये एव वन्ह्यभावा ह्रदादौ वह्निर्नास्तीति बुद्धिं जनयन्ति प्रत्येकं धूमसमानाधिकरणानां तेषां प्रतियोगितावच्छेदकत्वं वह्नित्वेऽप्यस्तीत्यव्याप्तिर्दुर्वारैवेति तत्साधनसङ्गत्या उपष्टम्भसङ्गतिरिति वाच्यम् । हेत्वधिकरणवृत्तित्वावच्छेदेन यादृशधर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वमतादृशत्वस्य साध्यतावच्छेदकविशेषणतां स्वीकृत्य तादृशाव्याप्तेर्वारणसम्भवात् । न हि धूमाधिकरणवृत्तित्वावच्छिन्नविशेषाभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वम्, धूमवति वह्निर्नास्तीत्यप्रत्ययात्, अपि तु यावद्विशेषाभावाधिकरणह्रदादिवृत्तित्वावच्छिन्ने एवेति ।

इदमापाततः । तथाविधाभावीययत्किञ्चिदेकधर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्याऽनतिरिक्तवृत्तित्वरूपावच्छेदकताविवक्षापक्षेऽपि धूमत्वादेरवच्छेदकत्वस्य सामान्याभावानतिरिक्तत्वमते शक्योपपादनत्वात् । हेत्वधिकरणवृत्तित्वावच्छिन्ने यद्धर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वविवक्षयाऽव्याप्तेरपि शक्यवारणत्वात् । वह्नित्वस्य वह्निघटोभयत्वावच्छिन्नाभावप्रतियोगितानतिरिक्तवृत्तित्वेऽपि तन्न्यूनवृत्तितया अन्यूनानतिरिक्तवृत्तित्वविवक्षया तादृशप्रतियोगितामादाय दूषणस्योद्धारः सम्भवतीति तार्णातार्णदहनोभयाभावप्रतियोगितानुसरणम् । अतिप्रसङ्गात् । धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रसङ्गात् । तार्णातार्णदहनोभयत्वावच्छिन्नाभावानुसरणप्रयोजनं स्वयमेव स्फुटयति–

(दी०) एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम् । अत एव नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपि न निस्तारः । लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः, तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेन्न । प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् ।

(गा०) एतेनेति । तार्णातार्णदहनोभयाभावप्रतियोगितामादायाऽतिप्रसङ्गतादवस्थ्येनेत्यर्थः । अन्यूनवृत्तित्वविशेषितम, अनतिरिक्तवृत्तित्वमपि । अत एव । दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसङ्गादेव । नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपीति । तथा सति यत्किञ्चिदेकाभावप्रतियोगितासामान्यपर्यन्तानिवेशेऽपि धूमत्वादेर्धूमादिसामान्याभावप्रतियोगितावच्छेदकत्वोपपादनसम्भवादिति भावः । उभयत्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीतेरव्यासज्यवृत्तितया स्वपर्याप्त्यधिकरणपर्याप्तत्वं प्रतियोगितायां निवेश्याऽपि वह्नित्वादावतिप्रसङ्गवारणासम्भव इति ध्येयम् । प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिपक्षे मेयधूमवान् वह्नेरित्यादावतिव्याप्तिर्न सम्भवति साध्यतावच्छेदकमेयधूमत्वादिरूपगुरुधर्मावच्छेद्यत्वस्य कुत्रापि प्रसिद्धिविरहेण तद्घटितोभयाभावाप्रसिद्धेरिति तन्मते मेयवह्निमान् धूमादित्यादावव्याप्तिमाह । लघुरूपेति । तादृशतदवच्छेद्यत्वाप्रसिद्धेरिति । तादृशसाध्यतावच्छेदकावच्छिन्नत्वस्याऽप्रसिद्धेरित्यर्थः । विषयितासम्बन्धस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावप्रतियोगितायां तत्प्रसिद्धिरित्यस्य वक्तुमशक्यत्वात् । अन्यथा मेयधूमवान् वह्नेरित्यादावतिव्याप्तेरेव तादवस्थ्यादिति भावः । प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्येति । तथा च धूमादिसामान्याभावप्रतियोगितायाः प्रतिधूमादिकं भिन्नत्वेऽपि तत्प्रतियोगितावच्छेदकधूमत्वादेरैक्येन स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकतत्कत्वात्मकस्वव्यापकतत्कत्वरूपतदनतिरिक्तवृत्तित्वं धूमत्वादावक्षतमेवेति भावः ।

न च प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभावप्रतियोगितायाः विशेषाभावप्रतियोगितातो न भेदः, प्रतियोगिनामभेदात्, तथा च वह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारा, धूमसमानाधिकरणविशेषाभावप्रतियोगिताकूटे वह्नित्वादेरवच्छेदकत्वात्तस्य च तदनतिरिक्तवृत्तित्वादिति वाच्यम् । सामान्याभावविशेषाभावयोः प्रतियोगित्वाभेदेऽपि सामान्याभावीयप्रतियोगितात्वेनैव सामान्यधर्मावच्छेद्यत्वाद्धेतुसमानाधिकरणाभावप्र-

तियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्वविवक्षणेनाऽव्याप्ति-निरासात् ।

स्वव्यापकतत्कत्वमित्यत्र स्वस्य व्याप्यता साध्यतावच्छेदकताघटकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकताघटकसम्बन्धेन च बोध्या, तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादेरव्यापकत्वेऽपि समवायादिना वह्नित्वादिकं प्रति कालिकादिसम्बन्धेन घटत्वादेर्व्यापकत्वेऽपि च न क्षतिः । दण्डिमान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकदण्डादौ दण्डान्तरसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेऽपि तत्तद्दण्डादौ तत्तद्दण्डादिसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वस्याऽक्षततया सर्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमक्षतमेवेति नातिव्याप्तिः । दण्डाद्यवच्छिन्नसाध्यकसद्धेतावपीदृशरीत्याऽव्याप्तिरिति तु नाशङ्कनीयम् । दण्ड्यादौ साध्ये परम्परासम्बन्धेनाऽखण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकतायाः स्वीकृतत्वात् ।

नन्वेवमपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निघटोभयत्वानतिरिक्तवृत्तितया वह्नित्वादेरवच्छेदकत्वं दुर्वारमेव । न चोभयत्वादेरुभयादिपर्याप्ततया प्रत्येकं तदत्यन्ताभावस्तदवच्छिन्नभेदश्च वर्तते, अयमेको न द्वाविति सर्वजनसाधारणानुभवस्य दुरपह्नवत्वात् । तादृशप्रतीतेरेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न कपिसंयोगीत्यादिप्रतीतेरपि मूलादौ कपिसंयोगाद्यवच्छेदकत्वाभावावगाहितास्वीकारापत्तेः । यदि च तत्र बाधकाभावाद्वृक्षाद्यधिकरणककपिसंयोगाद्यभावो विषयस्तदा प्रकृतेऽपि एकत्वाद्यवच्छिन्नाधिकरणकद्वित्वाभावादिविषयकत्वं दुर्वारमेव । एकत्वाद्यवच्छिन्ने द्वित्वादिमत्त्वप्रत्ययानुदयेन बाधकविरहस्य तुल्यत्वात् । प्रत्येकमुभयादौ द्वित्वाभावादिसत्त्वेऽपि द्वित्वाभावानुयोगितानवच्छेदकतया द्वौ न द्वाविति प्रतीतेर्दुरुपपादत्वात् । द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्येष्टत्वात् । नञ्पदेनाऽन्वयितावच्छेदकावच्छेदेनाभावबोधनात् द्वित्वादिसामानाधिकरण्यमात्रावगाहिन्या अभावप्रतीतेर्द्वौ न द्वावित्याकारकताविरहात् । तदाकारकप्रतीतेरेव चाऽनुभवविरुद्धत्वात् ।

तथा च द्वित्वाद्यनतिरिक्तवृत्तिता कथं वह्नित्वादेरिति वाच्यम्। एवं सति वह्निघटोभयवान् धूमादित्यादौ साध्यतावच्छेदकाद्वित्वादेरवच्छेदकताया दुरुपपादत्वात्। प्रतियोगितावच्छेदकतादृशद्वित्वादिकमुपादायैव तस्याऽवच्छेदकानतिरिक्तवृत्तित्वस्य सम्पाद्यत्वात्, तस्य चोक्तरीत्याऽसम्भवादिति स्वव्यापकतत्कत्वरूपतदनतिरिक्तवृत्तित्वघटकव्यापकतायां प्रतियोगितान्यधिकरणत्वस्य भेदे निवेशनीयतया उभयत्वादावपि वह्नित्वनिरूपिततादृशव्यापकताया अक्षतत्वेन तदवच्छेदकताप्रसङ्गस्य दुर्वारत्वात्। न हि प्रत्येकवृत्तिरुभयत्वाद्यवच्छिन्नभेदः प्रतियोगितान्यधिकरणः। उभयत्वादेर्व्यासज्यवृत्तित्वेऽपि तदवच्छिन्नप्रतियोगिताया अव्यासज्यवृत्तितया प्रत्येकमुभयत्वाद्यनाधिकरणतावत्तदवच्छिन्नभेदप्रतियोगितानधिकरणत्वस्याऽसम्भवादित्याशङ्क्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वघटकमवच्छेदकं स्वसमानवृत्तिकत्वेन विशेषयति–

(दी०) स्वसमानवृत्तिकं चाऽवच्छेदकं ग्राह्यम्। तत्त्वं च स्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वम्। यावत्त्वादिकं तु न तथा। पर्याप्तिश्चायमेको घट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव। त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः। घटकं चाऽवच्छेदकत्वं स्वरूपसम्बन्धविशेषः। एवं च यद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यम्, तेनोक्ताव्याप्तिनिरासः।

(गा०) स्वेति। तथा च वह्निघटोभयत्वादेर्वह्नित्वादिसमानवृत्तिकताविरहाद्वह्नित्वादेस्तदनतिरिक्तवृत्तित्वेऽपि न पारिभाषिकावच्छेदकतापत्तिरिति भावः।

अत्र व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेदकावच्छिन्नाधिकरणताकत्वरूपस्याभावविशेषणत्वोपगमे तु द्वित्वाद्यधिकरणस्य प्रत्येकं द्वित्वाद्यवच्छिन्नभेदाद्यधिकरणत्वेऽपि द्वित्वादेर्द्वित्वादिव्यापकत्वं भेदे प्रतियोगितावैयधिकरण्यमनिवेश्यैवो-

पपादयितुं शक्यमिति स्वसमानवृत्तिकत्वनिवेशनमयुक्तम् । न चा-व्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्याऽव्याप्यवृत्तितामते संयोगेन दण्डादेर्यत्र साध्यतावच्छेदकता तत्र व्यभिचारिणि हेतु-समानाधिकरणाभावप्रतियोगितावच्छेदकं दण्डादिकमादाय दण्डादिरूपसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वं व्यापकताशरीरे प्रतियोगितावैयधिकरण्याप्रवेशे न स्यादिति वाच्यम् । अव्याप्यवृत्तिदण्डादिकमादाय पारिभाषिकावच्छेदकत्वासम्भवेऽपि व्यभिचारनिरूपकाधिकरणयत्किञ्चिद्व्यक्त्यवृत्तित्वरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमुपादाय दण्डादेः साध्यतावच्छेदकस्य तथात्वोपपादनसम्भवात् । तदवृत्तौ साध्ये तदवृत्तित्वावच्छिन्नभेदस्य कथमप्यसम्भवादिति तु चिन्तनीयम् ।

ननु किमिदं समानवृत्तिकत्वम् ? यद्यन्यूनानतिरिक्तवृत्तित्वं तदाऽनतिरिक्तवृत्तित्वान्तनिवेशवैफल्यम्, स्वान्यूनवृत्ति यत्तदनतिरिक्तवृत्तित्वस्य स्वस्मिन्नियतत्वात् । तार्णातार्णदहनोभयत्वादिकमादाय दहनत्वादेरवच्छेदकत्वापत्तेश्च दुर्वारता । यदि चैकजातीयवृत्तिकत्वमेव तत्, तच्च स्वनिष्ठव्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपवत्त्वम्, द्वित्वादौ च वह्नित्वादेर्नैतादृशसमानवृत्तिकत्वं वह्नित्वादेरव्यासज्यवृत्तित्वादित्युच्यते तदाऽपि वह्निधूमोभयवान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निधूमघटत्रित्वाद्यनतिरिक्तवृत्तितया साध्यतावच्छेदकस्य तथात्वापत्तेः । द्वित्वत्रित्वाद्योरुभयोरेव व्यासज्यवृत्तितया निरुक्तसमानवृत्तिकताया दुरपवादत्वादित्यत आह । तत्त्वं चेति । स्वसमानवृत्तिकत्वं चेत्यर्थः ।

वह्निनिष्ठयावत्त्वतार्णातार्णोभयत्वादिकमादाय वह्नित्वादावतिप्रसङ्गाभावं स्फुटयति । यावत्त्वादिकमिति । आदिना दर्शितद्वित्वादिपरिग्रहः । न तथा । न स्वपर्याप्त्यधिकरणपर्याप्तत्वरूपवह्नित्वादिनिरूपितसमानवृत्तिकत्ववत् । वह्नित्वादेः प्रत्येकवह्न्यादौ पर्याप्तत्वात्तस्य चाऽतथात्वादिति शेषः । तथा च यावत्त्वादेः धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि वह्नित्वाद्यन्यूनानतिरिक्तवृत्तित्वेऽपि च न क्षतिरिति भावः ।

ननु पर्याप्तिराश्रयत्वमेव वह्नित्वादिसमानाधिकरणयावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणपर्याप्तत्वमक्षतमेवेत्यत आह । पर्याप्तिश्चेति ।

अयमेको घट इत्यनेनाऽव्यासज्यवृत्तिघटत्ववह्नित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितम् । इमौ द्वाविति प्रतीतिकथनेन व्यासज्यवृत्ति-द्वित्वादीनां न प्रत्येकपर्याप्तिस्तथा सति अयमेको द्वावित्यादिप्रतीत्यापत्तेरिति दर्शितम् ।

यद्यपि समुदायपर्याप्तत्वेऽपि तदेकदेशप्रत्येकपर्याप्तत्वमनपवादम्, समुदायस्यैकदेशानतिरिक्तत्वादिति यावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणप्रत्येकवह्निपर्याप्तत्वं दुर्वारम् । तथाऽपि स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्वमत्र विवक्षितमिति न दोषः । व्यासज्याव्यासज्यवृत्त्योः समानजातीयवृत्तिकधर्मावच्छिन्नपर्याप्तयोरेकधर्मिणि पर्याप्तिसत्त्वेऽप्येकधर्मावच्छिन्नेऽपर्याप्तेः । अन्यथाऽयमेको वह्निरितिवदयमेको यावानिति प्रतीत्यापत्तेर्दुर्वारत्वात् ।

अथ घटावित्यादौ यदि घटत्वादिसामानाधिकरण्यमात्रेण द्वित्वादिपर्याप्तिर्भासते तदा आकाशावित्याकारकप्रतीतेरपि प्रमात्वापत्तिः, आकाशत्वादिसामानाधिकरण्येनाऽऽत्माकाशोभयत्वादेः पर्याप्तत्वादतस्तत्र धर्मितावच्छेदकघटत्वाद्यवच्छिन्नपर्याप्तेरेव विषयत्वमङ्गीकार्यम् । तथा चाऽव्यासज्यवृत्तेरपि द्वित्वावच्छेदकत्वमायातमिति व्यासज्यवृत्तेरव्यासज्यवृत्तिसमानवृत्तिकत्वं दुर्वारमेव । न चानेकवृत्तेरव्यासज्यवृत्तेरपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकत्वमास्तां तादृशधर्मस्य च नाऽव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वं किं त्वेकैकमात्रवृत्तेरेवेति न व्यासज्यवृत्त्यव्यासज्यवृत्त्योरेकधर्मावच्छिन्नपर्याप्तत्वप्रसङ्ग इति वाच्यम् । घटो द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादिपर्याप्त्यवगाहनादेकमात्रवृत्तेरेवाव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वमित्युक्त्यसम्भवात् । तत्र घटत्वादिसामानाधिकरण्यमात्रेण द्रव्यत्वादिपर्याप्तिर्भासते न तु तदवच्छेदेनेत्युक्तावयमेको घट इत्यादावपि इदन्त्वादौ घटत्वादिपर्याप्त्यवच्छेदकताभाने विवादसम्भवेनाऽव्यासज्यवृत्तिधर्मपर्याप्तेरवच्छिन्नत्वस्यैवाप्रांसिद्धिप्रसङ्गात् । धूमत्वादिपर्याप्त्यवच्छेदकाप्रसिद्ध्या तत्राऽवच्छेदकलक्षणाव्याप्तिप्रसङ्गात् । न च स्वपर्याप्त्यवच्छेदकताव्यापकपर्याप्त्यवच्छेदकताकत्वमेव विवक्षणीयम्, अव्यासज्यवृत्तिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मे व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताविरहान्न

तस्या व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताव्यापकत्वमिति व्यासज्याव्यासज्यवृत्त्योर्न समानवृत्तिकताप्रसङ्ग इति वाच्यम् । एवं सति अनतिरिक्तवृत्तित्वनिवेशवैफल्यापत्तेः । न्यूनवृत्तिमहानसीयवह्नित्वादिपर्याप्त्यवच्छेदकतायाः वह्नित्वादिपर्याप्त्यवच्छेदकताव्यापकताविरहेणैव तादृशधर्ममुपादाय वह्नित्वादेरवच्छेदकतापत्त्यसम्भवादिति चेन्न । अनेकवृत्तिघटत्वादेर्हि तत्तद्घटत्वादिरूपैकैकमात्रवृत्तिधर्मावच्छिन्नपर्याप्तिकूटस्य घटनिष्ठपर्याप्तित्वादिरूपानुगतधर्मावच्छिन्नस्याऽवच्छेदकत्वमेवोपेयते न तु घटत्वावच्छिन्ने द्रव्यत्वादेर्यावद्घटादिषु पर्याप्त्यन्तरम्, मानाभावात् । एवं चैकमात्रवृत्तिधर्मावच्छिन्नायाः पर्याप्तेरवच्छेदकत्वस्यैव विवक्षणीयतयानुगतरूपावच्छिन्नपर्याप्तिकूटावच्छेदकानेकवृत्तिधर्मावच्छिन्नपर्याप्तिमादाय व्यासज्यवृत्तेर्नाव्यासज्यवृत्तिसमानवृत्तिकतापत्तिरिति ।

न च कालाकाशावित्यादिप्रतीत्या एकमात्रवृत्तिकालत्वादेरपि द्वित्वादिपर्याप्त्यवच्छेदकत्वावगाहनादेकमात्रवृत्तिधर्माणामपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकतया तस्याव्यासज्यवृत्तिधर्मसमानवृत्तिकत्वं दुर्वारमिति वाच्यम् । तादृशप्रतीत्या तथाविधधर्मद्वयादौ व्यासज्यवृत्तेरेव द्वित्वादिपर्याप्त्यवच्छेदकताया अवगाहनात् । प्रकृते चाऽव्यासज्यवृत्त्यवच्छेकदताया एव निवेशेनातिप्रसङ्गविरहात् ।

अत्राऽऽहुः । अव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यसम्बन्धान्तरे मानाभावः समवायादिसम्बन्धेनैवोपपत्तेः । न च समवायस्यैक्येन पटादावपि घटत्वादिविशिष्टबुद्धिप्रसङ्ग इति प्रतिनियतप्रतियोगिकपर्याप्तिसम्बन्धस्वीकार इति वाच्यम् । प्रतिनियतप्रतियोगिकैकविधसम्बन्धेनैवोपपत्तेर्द्विविधसम्बन्धसिद्धेः कथमप्यसम्भवात् । एवं द्वित्वादेरपि पर्याप्तिसमवायादिरूपसम्बन्धद्वयकल्पनमयुक्तम्, अनेकवृत्तिधर्मावच्छिन्नैकविधसम्बन्धेनैव निर्वाहात् ।

न चायमेको द्वित्वसम्बन्धीति प्रतीतेरेकमात्रवृत्तिधर्मावच्छेदेनाऽपि द्वित्वादेः सम्बन्धान्तरस्वीकार आवश्यक इति वाच्यम् । तादृशप्रतीतावपि एकत्वसामानाधिकरण्येनानेकवृत्तिधर्मावच्छिन्नसम्बन्धस्यैव भानोपगमात् । द्वित्वादिप्रकारकतत्सम्बन्धसंसर्गकबुद्धावेव तत्सम्बन्धांशे धर्मितावच्छेदकावच्छिन्नत्वभाननियमात् ।

सम्बन्धप्रकारकोक्तबुद्धौ धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहितासम्भवादिति । तथा च समवायातिरिक्तस्य संसर्गकोटावनन्तर्भावेऽव्यतिप्रसङ्गवारणसम्भवः। स्वाधिकरणतावच्छेदकावच्छिन्नाधिकरणताकत्वरूपस्य समानवृत्तिकत्वस्य लक्षणे निवेशनीयत्वात् ।

व्यासज्यव्यासज्यावृत्तित्वान्यतररूपेण सजातीयत्वरूपसमानवृत्तिकत्वमुपेक्ष्य स्वपर्याप्त्यधिकरणपर्याप्तत्वनिवेशस्य प्रयोजनं सूचयति । त्रित्वादिकमिति । द्वित्वादिसमानवृत्तिकम् । द्वित्वादिपर्याप्त्यधिकरणपर्याप्तवृत्तिकम्। त्रयो द्वावित्यादिप्रत्ययविरहादिति भावः द्वित्वादिना । वह्निधूमोभयत्वादिना साध्यतायाम् । नाऽव्याप्तिः । न धूमादावव्याप्तिः । द्रव्ये द्रव्याणीत्यादिप्रतीत्या द्रव्यत्वाद्यैकैकधर्मस्य द्वित्वत्रित्वादिन्यूनाधिकवृत्तिसंख्यापर्याप्त्यवच्छेदकत्वेऽपि तादृशधर्मस्य प्रत्येकतत्पर्याप्त्यतिप्रसक्तत्वेनाऽनुगमकयत्किञ्चिद्रूपावच्छिन्नपर्याप्तिकूटं प्रत्येवाऽवच्छेदकतया पूर्वविवक्षया सामञ्जस्यमिति ध्येयम् ।

आत्माश्रयशङ्कां निरस्यति । घटकं चेति । स्वरूपसम्बन्धविशेष इति । तादृशावच्छेदकताश्रयसमनियतलघुधर्मानतिरिक्तवृत्तित्वमादायैव कम्बुग्रीवादिमत्त्वादाववच्छेदकत्वोपपादनसम्भवादिति भावः । प्रतियोगिताधर्मिकोभयाभावघटनापक्षे गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नत्वाप्रसिद्धिनिबन्धनामव्याप्तिं परिहरति। एवमिति । यद्धर्मान्यूनवृत्तीति । तदन्यूनवृत्तित्वं तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वम्, तत्र पूर्वोक्तयुक्त्या भेदे प्रतियोगितावैयधिकरण्यनिवेशाद्वह्निघटोभयत्वादेर्वह्नित्वाद्यन्यूनवृत्तित्वमक्षतमेवेति यद्धर्मपर्याप्त्यधिकरणपर्याप्तत्वमपि निवेश्यमतो धूमसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽपि न क्षतिः । प्रतियोगितायाः प्रतियोगिभेदेन भेदे धूमादिसामान्याभावप्रतियोगितायाः प्रत्येकं धूमत्वाद्यन्यूनवृत्तिताविरहेणातिव्याप्तिः । नानाप्रतियोगिवृत्तिप्रतियोगितायाः ऐक्ये वह्निघटोभयत्वाद्यवच्छिन्नप्रतियोगितायां प्रत्येकपर्याप्तायां वह्नित्वादिपर्य्याप्त्यधिकरणपर्याप्तत्वसहितवह्नित्वाद्यन्यूनवृत्तित्वसत्त्वादव्याप्तिरतस्तदन्यूनवृत्तित्वमात्रमुपेक्ष्याऽन्यूनवृत्तिधर्माव-

च्छिन्नत्वपर्यन्तस्योभयाभावप्रतियोगितायां निवेशः ।

अथात्र दण्डादिनानाव्यक्तिसाध्यतावच्छेदकके व्यभिचारिविशेषेऽतिव्याप्तिः, निखिलानामेव दण्डादिव्यक्तीनां दण्डादिरूपसाध्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छेदकतया हेतुसमानाधिकरणदण्डाद्यवच्छिन्नाभावप्रतियोगितायां तादृशभेदप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावसत्त्वात् । तादृशभेदप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपं तद्रूपविशिष्टावच्छेद्यत्वाभावनिवेशे दण्ड्यादिमन्निष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकदण्डत्वादिविशिष्टावच्छेद्यत्वस्य दण्ड्यादिसामान्याभावप्रतियोगितायां सत्त्वेन तत्रातिव्याप्तिपरिहारेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमाद्यभावप्रतियोगितायां लाघवेन स्वरूपत एव धूमत्वादेरवच्छेदकतया विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वाभावसत्त्वात् । न च विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम् । घटावृत्तिजातिमत्सामान्याभावप्रतियोगितायामेव तत्प्रसिद्धेरिति चेन्न । दण्डाद्यात्मकसाध्यतावच्छेदकस्य साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासम्भवेऽपि व्यभिचारानिरूपकाधिकरणं यत्तद्वृत्त्यन्यत्वस्याखण्डस्य तथात्वात्तदवच्छेद्यत्वाभावस्यापि हेतुसमानाधिकरणाभावप्रतियोगितासामान्येऽसत्त्वेन दण्ड्यादिसाध्यके ऽनतिप्रसङ्गात् ।

अथ वा साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितायां यादृशरूपावच्छिन्नत्वं नास्ति तादृशरूपावच्छिन्नत्वाभावस्य विवक्षणीयत्वाद् दण्डादिसाध्यतावच्छेदकके व्यभिचारिणि दण्ड्यादिनिष्ठभेदप्रतियोगितायां तत्ताविशिष्टदण्डाद्यवच्छिन्नायां दण्डत्वादिविशिष्टावच्छेद्यत्वाभावसत्त्वाद्दण्ड्यादिसामान्याभावप्रतियोगितायां च तादृशाभावासत्त्वेनातिव्याप्त्यनवकाशात् । अवच्छेदकतयोरेकसम्बन्धावच्छिन्नत्वं निवेश्य सम्बन्धभेदनिबन्धनो दोषो निरस्यः ।

सत्तावान् जातेरित्यादौ सत्तात्वादेर्हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितयाऽव्याप्तिरिति प्रतियोगितावच्छेदकाव्यभिचारित्वरूपस्य स्वव्यापकतत्कत्वरूपस्य च तदनतिरिक्तवृत्तित्वस्य निवेशो न सम्भवतीति यद्धर्मविशिष्टस्य प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाव्यभिचा-

रिता, प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नस्य वा यद्रूपविशिष्टव्यापकता तत्त्वरूपं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयम्, तावतैव च वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदकमादाय वह्नित्वादेः पारिभाषिकावच्छेदकत्वनिरासः सम्भवति, वह्नित्वादिविशिष्टस्य तादृशोभयत्वाद्यवच्छिन्नव्यभिचारित्वात्, तादृशोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणनिवेशं विनैव निर्वाहः, एवं यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकस्य व्याप्तिघटकतापक्षेऽपि तदन्यूनवृत्तित्वं यदि तद्व्यापकत्वं तदा सत्तात्वव्यापकविशिष्टसत्तात्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादुक्तस्थले एवाव्याप्तिरिति तद्विशिष्टव्यापकतावच्छेदकत्वरूपं तदन्यूनवृत्तित्वमेव निवेश्यम्, तावतैव वह्निघटोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकतया धूमादिसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽप्यव्याप्त्यनवकाशात् । यद्धर्मान्यूनवृत्तिधर्मे यद्धर्मसमानवृत्तिकत्वविशेषणप्रक्षेपमन्तरेणैव सामञ्जस्यमित्याशयेनाह । वस्तुतस्त्वित्यादि ।

(दी०) वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वम्, स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम् ।

(गा०) तदवच्छिन्नेति । तत्पदमनतिरिक्तवृत्तित्वप्रतियोगिभूतहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणपरम । स्वपदमनतिरिक्तवृत्तित्वेनाभिमतपरम् । धूमत्वाद्यवच्छिन्नाभाववति मेयधूमत्वादिविशिष्टस्यासम्बद्धतया मेयधूमत्वादेरवच्छेदकतानिर्वाहः । धूमत्वाद्याश्रयमहानसीयधूमाद्यभाववति धूमत्वादिविशिष्टस्य सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या तद्धूमत्वादिरूपावच्छेदकभेदमादायातिव्याप्तिरिति तदाश्रयप्रतियोगिकत्वं परित्यज्य तदवच्छिन्नप्रतियोगिताकत्वमभावविशेषणमुपात्तम् । हेतुसमानाधिकरणाभावप्रतियोगितायां यस्य येन सम्बन्धेनावच्छेदकता तेन सम्बन्धेन तदवच्छिन्नत्वं निवेशनीयम्, तेन विषयितया धूमत्वाद्यवच्छिन्नस्य ज्ञानादेर-

भाववति धूमत्वादिविशिष्टधूमादेः सम्बद्धत्वेऽपि न धूमत्वादेरवच्छेदकत्वानुपपत्तिः । उत्पत्तिकालावच्छेदेन धूमत्वाद्यवच्छिन्नाभाववति धूमत्वादिविशिष्टस्य संयोगरूपसाध्यतावच्छेदकसम्बन्धेन सम्बद्धतया तादृशं स्वं गुणत्वादिकमेवेति संयोगेन धूमादिसाध्यके व्यभिचारिण्यतिप्रसङ्गस्य वारणाय प्रतियोगिवैयधिकरण्यमभावे विशेषणं देयम् । धूमाद्यभावस्यापि ह्रदादौ प्रतियोगिव्यधिकरणतया तदभाववारणासम्भवात् । साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमद्वृत्तिर्यो यस्तद्भिन्नत्वनिवेशे संयोगेनावृत्तेर्गुणादेरेवाभावस्य प्रसिद्ध्या तद्वति धूमत्वादिविशिष्टस्य संयोगेन सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या पूर्ववद् गुणत्वादेरेवावच्छेदकत्वादतिव्याप्तितादवस्थ्यम् । स्वपदेनानुयोगिभूताभावोपादाने संयोगेन साध्यतायां सद्धेतौ तादृशसम्बन्धेन गुणाभावप्रतियोगिनोऽधिकरणाप्रसिद्ध्या तादृशाभावाप्रसिद्धेरव्याप्तिरतः प्रतियोगिवैयधिकरण्यविशिष्टाभावाधिकरणासम्बद्धत्वं विवक्षणीयम् । द्रव्यं गुणादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नाभावप्रतियोग्यनधिकरणगुणादौ द्रव्यत्वत्वादिविशिष्टस्यासम्बद्धतया द्रव्यत्वत्वादेरवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव प्रवेश्यम् । तद्धर्मस्य तद्धर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेनोपादानं शिरोवेष्टनेन नासिकास्पर्शमनुकरोतीति तद्धर्मावच्छिन्नवैयधिकरण्यविशिष्टत्वमेव निवेशनीयम् । तद्धर्मावच्छिन्नानधिकरणासम्बद्धस्वविशिष्टसामान्यकत्वं तु फलितार्थः । तद्धर्मावच्छिन्नानधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन तदसम्बन्धित्वम् । तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणसमवायसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकगुणादिविषयकज्ञानत्वाद्यवच्छिन्नस्य विषयतया द्रव्यादिसम्बद्धस्य सम्बन्धसामान्येनानधिकरणे नित्यगुणादौ गुणत्वादिविशिष्टस्यासमेवतत्वेऽपि न गुणत्वादेरवच्छेदकताप्रसङ्गः । एवं च महाकालो घटवान् कालपरिमाणादित्यादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यशालिहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकगगनत्वादिविशिष्टस्य साध्यतावच्छेकसम्बन्धेन सम्बन्धिनोऽप्रसिद्ध्याऽव्याप्तेर्वारणाय साध्यतावच्छेदकसम्बन्धसामान्ये तद-

वच्छिन्नप्रतियोगिकत्वयद्यदधिकरणानुयोगिकत्वोभयाभावस्तत्तदधि-करणासम्बद्धस्वविशिष्टसामान्यकत्वं विवक्षणीयम्। ईदृशं च स्वं तत्र गगनत्वादिकमेव प्रसिद्धमिति नाऽव्याप्तिः। तदसम्बद्धत्वं च तदनुयोगिकसाध्यतावच्छेदकसम्बन्धाप्रतियोगित्वं तेन संयोगादिस-म्बन्धेन घटत्वाद्यवच्छिन्नाभाववति ज्ञाने कपालादौ विषयित्वस-मवायादिना घटत्वादिविशिष्टस्य सम्बद्धत्वेऽपि वह्निमान् धूमादि-त्यादौ नावच्छेदकाप्रसिद्धिः। तादात्म्येन साध्यतायां साध्यता-वच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिः स्यादित्यवृत्तित्वमुपे-क्ष्यासम्बद्धत्वानुधावनम्। विशिष्टसत्तावान् जातेरित्यादौ हेतु-समानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाभाववति गु-णादौ विशिष्टसत्तात्वाद्याश्रयसत्तादेः सम्बद्धतया विशिष्टसत्ता-त्वादेरवच्छेदकत्वानुपपत्तिरिति स्वाश्रयेऽसम्बद्धत्वमनिवेश्य स्व-विशिष्टे तन्निवेशनम्।

यद्यपि विशेष्यस्य तत्सम्बन्धित्वे विशिष्टे तदसम्बन्धित्वं दु-र्घटम्, तथापि स्वविशिष्टप्रतियोगिकत्वाभाववत्तदवच्छिन्नाभाव-वदनुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य तदवच्छिन्ना-भाववदनुयोगिकसाध्यतावच्छेदकसम्बन्धप्रतियोगितावच्छेदकताप-र्याप्त्यधिकरणापर्याप्तविषयतापर्याप्त्यधिकरणत्वस्य वा विवक्षणीयत-या न दोषः। स्वविशिष्टप्रतियोगिकत्वानि च विशिष्योपादाय तदभा-वकूटमेव निवेशनीयम्। तेन मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वा-वच्छिन्नाभावस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतामतेऽप्र-सिद्धावपि न क्षतिः।

वस्तुतो मेयधूमत्वादिविशिष्टप्रतियोगिकत्वाभावस्य शुद्धधूमत्वा-दिप्रकारकज्ञाननिष्ठविषयितासम्बन्धसाधारणत्वाद् धूमत्वादिविशि-ष्टप्रतियोगिकत्वत्वस्य लघुधर्मस्य न तत्प्रतियोगितावच्छेदकत्वसम्भ-व इति न मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावा-प्रसिद्धिरिति सामान्यत एकाभावनिवेशोऽपि सम्भवतीति ध्येयम्।

येन रूपेण यस्य यद्धर्मिसम्बन्धिता तदन्यरूपावच्छिन्ने त-त्र तत्सम्बद्धत्वाभावसत्त्वमभ्युपेत्य वा एतल्लक्षणम्। द्वितीय-लक्षणं च तदनभ्युपगमेन। धूमादिसमानाधिकरणाभावप्रतियो-गितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नाद्यभाववति वह्नित्वादिवि-

शिष्टमहानसीयवह्न्यादेरसम्बद्धतया वह्नित्वादावतिप्रसङ्गवारणाय सामान्यपदम् ।

अथ साध्यतावच्छेदकसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति कालिकादिसम्बन्धेन घटत्वादिविशिष्टस्य पटादेः संयोगादिसम्बन्धेन सम्बद्धत्वादवच्छेदकाप्रसिद्धिः । साध्यतावच्छेदकताघटकसम्बन्धेन स्वविशिष्टत्वनिवेशेऽपि कालिकसम्बन्धेन घटत्वादिविशिष्टस्य कालिकसम्बन्धेन साध्यतायां महाकालपरिमाणादिहेतुकेऽवच्छेदकाप्रसिद्धिर्दुर्वारैव गगनत्वाद्यवच्छिन्नाभाववति काले कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य स्पन्दादेः कालिकसम्बन्धेन सम्बद्धत्वात् । प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धेन वैशिष्ट्यनिवेशे घटत्वादिसमनियतासमवेतगुरुधर्मस्य यत्र साध्यतावच्छेदकता तत्र तादृशधर्मस्य घटत्वादिकमादायावच्छेदकत्वानुपपत्तिः । घटत्वादेः समवायेन घटाद्यभावप्रतियोगितावच्छेदकत्वात्तत्सम्बन्धेन च तद्धर्मविशिष्टाप्रसिद्धेरिति चेन्न । यत्किञ्चित्सम्बन्धेन स्वविशिष्टसामान्येऽसम्बद्धत्वनिवेशनेन सामञ्जस्यात् ।

न चैवं वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नाभाववति विषयितासम्बन्धेन वह्नित्वविशिष्टस्य साध्यतावच्छेदकसंयोगेनाऽसम्बद्धत्वाद्वह्नित्वादेर्गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसविषयकत्वाद्यवच्छिन्नाभाववति घटादौ विषयितया गुणत्वादिविशिष्टस्याऽसमवेतत्वात् गुणत्वादेरवच्छेदकत्वापत्त्याऽव्याप्तिरिति वाच्यम् । साध्यतावच्छेदके तादृशपारिभाषिकावच्छेदकताशून्यत्वमनिवेश्य साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वांशे साध्यसामानाधिकरण्यघटके पारिभाषिकावच्छेदकताघटकसम्बन्धेन तादृशावच्छेदकावच्छिन्ननिरूपितत्वस्य निवेशनीयतया विषयितया वह्नित्वादेरवच्छेदकत्वेऽपि समवायरूपसाध्यतावच्छेदकताघटकसम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितायामधिकरणतायां विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितत्वाभावसत्त्वेन लक्षणसमन्वयात् । गुरुधर्मस्यापि प्रतीतिबलेनाधिकरणतानिरूपकतावच्छेदकत्वोपगमान्न गुरुधर्मावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्धिः ।

अथ वावच्छेदकताघटकसम्बन्धेनावच्छेदकविशिष्टावृत्तिविषयिताकत्वं साध्यतावच्छेदकतावच्छेदकसम्बन्धेन साध्यतावच्छेदकविशिष्टविशेषणमङ्गीकार्यम् । समवायसम्बन्धेन वह्नित्वादिविशिष्टस्य या विषयता तस्याः सम्बन्धान्तरेण वह्नित्वादिविशिष्टनिष्ठविषयतान्यतया नाऽव्याप्त्यवकाशः। स्वरूपसम्बन्धरूपावच्छेदकताप्रवेशमतेऽपि ईदृशी रीतिरेवादरणीया, अन्यथा वह्नित्वादिधर्मिकानवच्छेदकत्वादिग्रहस्य वह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वे धर्मितावच्छेदकतया वह्नित्वत्वादिविषयताया हेतुतावच्छेदककोटौ निवेशाद् गौरवस्य वह्नित्वत्वाद्यनुपस्थितिदशायां वह्निमानित्याद्याकारकानुमित्यनुपपत्तेश्च दुर्वारत्वात् ।

अत्र च यत्किञ्चिद्धेत्वधिकरणासम्बद्धस्वविशिष्टसामान्यकत्वस्य लघोरवच्छेदकान्तार्थत्वसम्भवे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वस्य गुरुतरस्य निवेशनं मूलोपात्तप्रतियोगितान्तस्य यथाश्रुतार्थकत्वानुरोधेन । अन्यथाऽवच्छेदकान्तसमुदायस्य पारिभाषिकैकपदतापत्तेः । यथा निरुक्तावच्छेदकतानिवेशेऽवच्छेदकपदस्यैवावच्छेदकावच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वे पारिभाषिकत्वं तद्वत् ।

अत्र च जातिमान् मेयत्वादित्यादौ जातित्वादेरवच्छेदकत्वानुपपत्तिः, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नाभाववति साध्यतावच्छेदकसमवायसम्बन्धेन सम्बद्धत्वप्रसिद्धिस्तद्धर्मावच्छिन्नाभाववति जातित्वादिविशिष्टस्याऽपि समवेतत्वात्। जातित्वाद्यवच्छिन्नाभाववति च समवेतत्वस्यैवाप्रसिद्ध्या तदभाववदसमवेतत्वस्य जातित्वादिविशिष्टादौ दुर्निरूपत्वात् । एवं यथाश्रुते विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वादेरप्यवच्छेदकत्वानुपपत्तिरतोऽन्यथानतिरिक्तवृत्तित्वं निर्वक्ति । स्वविशिष्टेति । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकशुद्धधूमत्वादेर्मेयधूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतया मेयधूमत्वादेरवच्छेदकत्वोपपत्तिः। जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकजातित्वादेर्जातित्वविशिष्टसमवायिनिष्ठाभावप्रतियोगितानवच्छेदकतया तस्य तथात्वोपपत्तिः । विशिष्ट-

सत्तावान् जातेरित्यादौ द्रव्यत्वत्वविशिष्टसत्तात्वादेर्विशिष्टसत्तात्वाश्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि विशिष्टसत्तात्वादिविशिष्टसम्बन्धिद्रव्यादिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाद्विशिष्टसत्तात्वादेरवच्छेदकतानिर्वाहः । सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन घटत्वादेर्विषयितादिसम्बन्धेन घटत्वादिविशिष्टसम्बन्धिज्ञानादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि नावच्छेदकाप्रसिद्धिः ।

अथैवं महाकालो घटवान् कालपरिमाणादित्यादाववच्छेदकाप्रसिद्धिः । साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽप्रसिद्ध्या स्वपदेन गगनत्वाद्युपादानासम्भवात् ।

न च सम्बन्धसामान्येन स्वविशिष्टसम्बन्धिनिष्ठः सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावो निवेश्यः । विषयितया गगनत्वादिविशिष्टसम्बन्धिनि तद्विषयकज्ञानादौ सम्बन्धसामान्येन प्रतियोगिव्यधिकरणस्य तादृशज्ञानासमानकालिकतत्तद्घटाभावादेः प्रतियोगितायां गगनत्वादेरनवच्छेदकत्वादुक्तस्थले गगनत्वादिकमवच्छेदकं प्रसिद्ध्यति, तादृशज्ञानादौ कालिकसम्बन्धेन गगनादेरभावसत्त्वेऽपि तस्य विषयितासम्बन्धेनैव प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् । वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकज्ञानत्वादेर्वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्याधिकरणाभावस्य प्रतियोगितानवच्छेदकतया वह्नित्वादेरवच्छेदकत्वापातात् । ज्ञानत्वाद्यवच्छिन्नाभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वात् ।

न च तादात्म्यसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठभेदप्रतियोगितानवच्छेदकत्वं विवक्षणीयम्, कालो घटवान् कालपरिमाणादित्यादौ गगनत्वादिविशिष्टाभिन्ननिष्ठभेदप्रतियोगितानवच्छेदकत्वाद् गगनत्वादिकमवच्छेदकमिति वाच्यम् । सत्तावान् जातेरित्यादौ तादात्म्येन सत्तात्वादिविशिष्टसम्बन्धिनि सत्तादौ यो भेदस्तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वादौ सत्त्वेन सत्तात्वादेरवच्छेदकत्वापातात् । तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणा-

भावस्य निवेशेऽपि घटत्वाभाववान् घटान्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाभावान्यवृत्तित्वविशिष्टघटत्वाभाववत्त्वादेरन्यतरसम्बन्धेन घटत्वाभाववत्त्वादिविशिष्टसम्बन्धिनिष्ठस्यान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वादव्याप्त्यापत्तेः। घटत्वाभाववत्त्वादिविशिष्टसम्बन्धिनि पटादौ घटत्वाभावान्यवृत्तित्वविशिष्टघटत्वाभाववत्त्वाद्यवच्छिन्नस्य साध्यतावच्छेदकसम्बन्धेन सत्त्वात्, घटत्वाभावे च तदवच्छिन्नस्य तादात्म्यसम्बन्धेन सत्त्वात्तन्निष्ठतदभावस्याऽन्यतरसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात्।

एतेन यत्किञ्चित्सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठो यस्तेन सम्बन्धेन प्रतियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकत्वविवक्षापि निरस्ता। तादात्म्येन सत्तात्वाद्यवच्छिन्नं प्रति तत्सम्बन्धेन विशिष्टसत्तात्वाद्यवच्छिन्नस्य व्यापकतयोक्तस्थले सत्तात्वादेरवच्छेदकताया दुर्वारत्वात्। कालिकसम्बन्धेन वह्नित्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वाद्यवच्छिन्नस्य व्यापकतया वह्निमान् धूमादित्यादौ वह्नित्वादेरवच्छेदकत्वापाताच्च।

न च येन येन सम्बन्धेन यो यः स्वविशिष्टसम्बन्धी तेन तेन सम्बन्धेन प्रतियोगिव्यधिकरणो यस्तन्निष्ठोऽभावस्तत्प्रतियोगितानवच्छेदकत्वं विवक्षणीयम्, संयोगसमवायादिना वह्नित्वसत्तात्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वविशिष्टसत्तात्वाद्यवच्छिन्नस्याऽव्यापकतया च नोक्तदोषावकाश इति वाच्यम्। एवं सति विषयितासम्बन्धेन कम्बुग्रीवादिमत्त्वादिविशिष्टसम्बन्धिनि तेन रूपेण घटाद्यवगाहिनि घटत्वाद्यप्रकारकज्ञानादौ विषयितया घटत्वादिविशिष्टस्यासत्त्वेन घटत्वादेस्तेन सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावप्रतियोगितावच्छेदकतया घटत्वादिकमादाय कम्बुग्रीवादिमत्त्वादेरवच्छेदकत्वनिर्वाहासम्भवात्।

न च हेतुसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नयत्किञ्चित्प्रतियोगितायां यदवच्छेदकं तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वं तस्य वाच्यम्, घटवान् कालपरिमाणादित्यादौ तादात्म्यं वि-

४६० ५३

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः। (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः। (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता१

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः। १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः। प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः। सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः। २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः। ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः। वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । २

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य-व्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ६

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य- बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाद्वटीकाद्वयसंवलिता। ११

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । ८

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यवीरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२) प्रसस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशंकरमिश्रविरचितम २

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत ३

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । १

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवदान्ताचार्यप्रसादिता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता। २

पत्रादिप्रेषणस्थानम् । } **जयकृष्णदास गुप्तः, सेक्रेटरी, चौखम्बा संस्कृत सीरीज आफिस, बनारस सिटी ।**